जयवल्लभं नाम वज्जालग्गं

संस्कृतच्छायासंवलितम् ।

सव्वन्नुवयणपङ्कय—निवासिणिं पणमिऊण सुयदेविं ।
धम्माइतिवग्गजुयं सुयणाण सुहासियं वोच्छं ॥ १ ॥
अमयं पाइयकव्वं पढिउं सोउं च जे न-याणन्ति ।
कामस्स तत्ततत्तिं कुणन्ति ते कह न लज्जन्ति ॥ २ ॥
विविहकइविरइयाणं गाहाणं वरकुलाणि घेत्तूण ।
रइयं वज्जालग्गं विहिणा जयवल्लहं नाम ॥ ३ ॥
एक्कत्थे पत्थावे जत्थ पढिज्जन्ति पउरगाहाओ ।
तं खलु वज्जालग्गं वज्ज त्ति य पद्धई भणिया ॥ ४ ॥
एयं वज्जालग्गं सव्वं जो पढइ अवसरम्मि सया ।
पाइयकव्वकई सो होहिइ तह कित्तिमन्तो य ॥ ५ ॥

सोयारवज्जा ।

दुक्खं कीरइ कव्वं कव्वम्मि कए पउञ्जणा दुक्खं ।
सन्ते पउञ्जमाणे सोयारा दुल्लहा होन्ति ॥ ६ ॥
सक्कयपसक्कयं पि ऊ अत्थो सोयारसङ्गमवसेण ।
अप्पुव्वरसविसेसं जणेइ जं तं महच्छरियं ॥ ७ ॥
मुत्ताहलं व कव्वं सहावविमलं सुवत्तसंघडियं ।
सोयारकण्णकुहरम्मि पयडियं पायडं होइ ॥ ८ ॥

गाहावज्जा ।

अद्धक्खरभणियाइं नूणं सविलाससुद्धहसियाइं ।
अद्धच्छिपेच्छियाइं गाहाहि विणा न नज्जन्ति ॥ ९ ॥

सर्वज्ञवदनपङ्कजनिवासिनीं प्रणम्य श्रुतदेवीं ।
धर्मादित्रिवर्गयुतं सुजनानां सुभाषितं वक्ष्यामि ॥ १ ॥
अमृतं प्राकृतकाव्यं पठितुं श्रोतुं च न जानन्ति ।
कामस्य तत्त्ववार्त्तां कुर्वन्ति ते कथं न लज्जन्ति ॥ २ ॥
विविधकविविरचितानां गाथानां वरकुलानि गृहीत्वा ।
रचितं वज्जालग्गं विधिना जयवल्लभं नाम ॥ ३ ॥
एकार्थे प्रस्तावे यत्र पठ्यन्ते प्रचुरगाथाः ।
तत्खलु वज्जालग्गं वज्जेति च पद्धतिर्भणिता ॥ ४ ॥
इदं वज्जालग्गं सर्वं यः पठत्यवसरे सदा ।
प्राकृतकाव्यकविः स भविष्यति तथा कीर्तिमांश्च ॥ ५ ॥

श्रोतृपद्धतिः ।

दुःखं क्रियते काव्यं काव्ये कृते प्रयुञ्जानो दुःखं ।
सति प्रयुञ्जाने श्रोतारो दुर्लभा भवन्ति ॥ ६ ॥
संस्कृतमसंस्कृतमपि खल्वर्थः श्रोतृसङ्गमवशेन ।
अपूर्वरसविशेषं जनयति यत्तन्महाश्चर्यं ॥ ७ ॥
मुक्ताफलमिव काव्यं स्वभावविमलं सुवर्णसंघटितं ।
श्रोतृकर्णकुहरे प्रकटितं प्रकटं भवति ॥ ८ ॥

गाथापद्धतिः ।

अर्धाक्षरभणितानि नूनं सविलासमुग्धहसितानि ।
अर्धाक्षिप्रेक्षितानि गाथाभिर्विना न ज्ञायन्ते ॥ ९ ॥

सालङ्काराहि सलक्खणाहि अन्नन्नरायरसियाहिं ।
गाहाहि पणइणीहि य खिज्जइ चित्तं अइन्तीहिं ॥ १० ॥
एयं चिय नवरि फुडं हिययं गाहाण महिलियाणं च ।
अणरसिएहि न लब्भइ दविणं व विहीणपुसेहिं ॥ ११ ॥
सच्छन्दिया सरूवा सालङ्कारा य सरसउल्लावा ।
वरकामिणि व्व गाहा गाहिज्जन्ती रसं देइ ॥ १२ ॥
गाहाण रसा महिलाण विब्भमा कइयणाण उल्लावा ।
कस्स न हरन्ति हिययं बालाण य मम्मणुल्लावा ॥ १३ ॥
सव्वो गाहाउ जणो लेसत्थो भणइ सव्वगोट्ठीसु ।
परमत्थो जो ताणं सो नाओ सइकइलेहिं ॥ १४ ॥
गाहा रुवइ वराई सिर्खिज्जन्ती गवारलोएहिं ।
कीरइ लुञ्चपलुञ्चा जह गाई मन्ददोहेहिं ॥ १५ ॥
गाहे भज्जिहिसि तुमं अहवा लङ्कयत्तणं पि पाविहिसि ।
गामारदन्तदिढकढिणपीडिया उच्छुजट्ठि व्व ॥ १६ ॥
गाहाणं गीयाणं तन्तीसद्दाण पोढमहिलाणं ।
ताणं चिय सो दण्डो जे ताण रसं न-याणन्ति ॥ १७ ॥
छन्दं अयाणमाणेहि जा किया सा न होइ रमणिज्जा ।
किं गाहा अह सेवा अहवा गाहा वि सेवा वि ॥ १८ ॥

कव्ववज्जा ।

चिन्तामन्दरमन्थाणमन्थिए वित्थरम्मि अत्थाहे ।
उप्पज्जन्ति कईहिययसायरे कव्वरयणाइं ॥ १९ ॥

सालङ्काराभिः सलक्षणाभिरन्योन्यरागरमिताभिः ।
गाथाभिः प्रणयिनीभिश्च खिद्यते चित्तमनागच्छन्तीभिः ॥ १० ॥
एतदेव केवलं स्फुटं हृदयं गाथानां महिलानां च ।
अरसिकैर्न लभ्यते द्रविणमिव विहीनपुण्यैः ॥ ११ ॥
सच्छन्दिता सरूपा सालङ्कारा च सरसोल्लापा ।
वरकामिनीव गाथा पठ्यमानानुभूयमाना च रसं ददाति ॥ १२ ॥
गाथानां रसा महिलानां विभ्रमा कविजनानामुल्लापाः ।
कस्य न हरन्ति हृदयं बालानां च मन्मथोल्लापाः ॥ १३ ॥
सर्वो गाथा जनो विश्वस्तो भणति सर्वगोष्ठीषु ।
परमार्थो यस्तासां स ज्ञातो महाविदग्धैः ॥ १४ ॥
गाथा रोदिति वराकी शिक्ष्यमाणा गौणलोकैः ।
क्रियते लुञ्चप्रलुञ्चा यथा गोर्मन्ददोग्धृभिः ॥ १५ ॥
गाथे भङ्क्ष्यसे त्वमथवा लघुत्वमपि प्राप्स्यसि ।
ग्रामीणदन्तदृढकठिनपीडिता इक्षुयष्टिरिव ॥ १६ ॥
गाथानां गीतानां तन्त्रीशब्दानां प्रौढमहिलानां ।
तेषामेव स दण्डो ये तेषां रसं न जानन्ति ॥ १७ ॥
छन्दोऽजानद्भिर्या कृता सा न भवति रमणीया ।
किं गाथाथ सेवाथवा गाथापि सेवापि ॥ १८ ॥

काव्यपद्धतिः ।

चिन्तामन्दरमन्थानमथिते विस्तरेऽस्ताघे ।
उत्पद्यन्ते कविहृदयसागरे काव्यरत्नानि ॥ १९ ॥

रयणुज्जलपयसोहं तं कव्वं जं तवेइ पडिवक्खं।
पुरिसायन्तविलासिणि— रसणादामं सिव रसन्तं॥ २०॥
पाइयकव्वम्मि रसो जो जायइ तह व छेयभणिएहिं।
उययस्स य वासियसीयलस्स तित्तिं न वच्चामो॥ २१॥
कहकहवि रएइ पयं मग्गं पुलएइ छेयमारुहइ।
चोरो व्व कई अत्थं घेत्तूण कहवि निव्वहइ॥ २२॥
सद्दावसद्दभीरू पए पए किंपि किंपि चिन्तन्तो।
दुक्खेहि कहवि पावइ चोरो अत्थं कई कव्वं॥ २३॥
सद्दपलोट्टं दोसेहि वज्जियं सुललियं फुडं मडरं।
पुण्णेहि कहवि पावइ छन्दे कव्वं कलत्तं च॥ २४॥
अणवरयबहलरोमञ्चकञ्चुयं जणियजणमणाणन्दं।
जं न धुणावइ सीसं कव्वं पेम्मं च किं तेण॥ २५॥
सो सोहइ दूसन्तो कइयणरइयाइ विविहकव्वाइं।
जो भञ्जिऊण कुवयं अन्नपयं सुन्दरं देइ॥ २६॥
अत्यक्खो रसरहिओ देसविहूणो णुणासिओ तुरिओ।
मुहवञ्चणो विराओ एए दोसा पढन्तस्स॥ २७॥
देसियसद्दपलोट्टं मडरक्खरछन्दसंठियं ललियं।
फुडवियडपायडत्थं पाइयकव्वं पढेयव्वं॥ २८॥
ललिए मडरक्खरए जुवईयणवल्लहे ससिङ्गारे।
सन्ते पाइयकव्वे को सक्कइ सक्कयं पढिउं॥ २९॥
अबुहा बुहाण मज्झे पढन्ति जे छन्दलक्खणविहूणा।
ते भमुहाखग्गनिवाडियं पि सीसं न लक्खन्ति॥ ३०॥

रसोज्ज्वलपदशोभं तत्काव्यं यत्तापयति प्रतिपक्षं।
पुरुषायमानविलासिनीरसनादामेव रसन्तं॥ २० ॥
प्राकृतकाव्ये रसो यो जायते तथा वा छेकभणितैः।
उदकस्य च वासितशीतलस्य तृप्तिं न व्रजामः॥ २१ ॥
कथंकथमपि रचयति पदं मार्गं प्रलोकयति (च्छेकं) छेदमारोहति
चोर इव कविरर्थं गृहीत्वा कथमपि निर्वहति॥ २२ ॥
शब्दापशब्दभीरुः पदे पदे किमपि किमपि चिन्तयन्।
दुःखैः कथमपि प्राप्नोति चोरोऽर्थं कविः काव्यं॥ २३ ॥
शब्दपर्यस्तं दोषैर्वर्जितं सुललितं स्फुटं मधुरं।
पुण्यैः कथमपि प्राप्नोति छन्दसि काव्यं कलत्रं च॥ २४ ॥
अनवरतबहुलरोमाञ्चकञ्चुकं जनितजनमनआनन्दं।
यन्न धूनयते शीर्षं काव्यं प्रेम च किं तेन॥ २५ ॥
स शोभते दूषयन् कविजनरचितानि विविधकाव्यानि।
यो भङ्क्ता कुपदमन्यत्पदं सुन्दरं ददाति॥ २६ ॥
अखिन्नो रसरहितो देशविहीनोऽनुनासिकस्वरितः।
मुखावस्थनो विराग एते दोषाः पठतः॥ २७ ॥
देशीशब्दपर्यस्तं मधुराक्षरच्छन्दःसंस्थितं ललितं।
स्फुटविकटप्रकटार्थं प्राकृतकाव्यं पठनीयं॥ २८ ॥
ललिते मधुराक्षरे युवतिजनवल्लभे सशृङ्गारे।
सति प्राकृतकाव्ये कः शक्नोति संस्कृतं पठितुं॥ २९ ॥
अबुधा बुधानां मध्ये पठन्ति ये छन्दोलक्षणविहीनाः।
ते भ्रूखड्गनिपातितमपि शीर्षं न लक्षयन्ति॥ ३० ॥

पाइयकव्वस्स नमो पाइयकव्वं च निम्मियं जेण ।
ताहं चिय पणमामो पढिऊण य जे वियाणन्ति ॥ २१ ॥

सज्जणवज्जा ।

सइणम्मि ससी सइणम्मि सुरतरू सइणसंभवा लच्छी ।
सुयणो उण कहसु महं न-याणिमो कत्थ संभूओ ॥ २२ ॥
सुयणो सुद्धसहावो मइलिज्जन्तो वि दुज्जणयणेण ।
छारेण दप्पणो विय अहिययरं निम्मलो होइ ॥ २३ ॥
सुयणो न कुप्पइ चिय अह कुप्पइ मङ्गुलं न चिन्तेइ ।
अह चिन्तेइ न जम्पइ अह जम्पइ लज्जिरो होइ ॥ २४ ॥
दढरोसकलुसियस्स वि सुयणस्स मुहाउ विप्पियं कत्तो ।
राहुमुहम्मि वि ससिणो किरणा अमयं चिय मुयन्ति ॥ २५ ॥
दिट्ठा हरन्ति दुक्खं जम्पन्ता देन्ति सयलसोक्खाइं ।
एयं विहिणा सुकयं सुयणा जं निम्मिया भुवणे ॥ २६ ॥
न हसन्ति परं न थुणन्ति अप्पयं पियसयाइ जम्पन्ति ।
एसो सुयणसहावो नमो नमो ताण पुरिसाणं ॥ २७ ॥
अकए वि कए वि पिए पियं कुणन्ता जयम्मि दीसन्ति ।
कयविप्पिए वि हु पियं कुणन्ति ते दुल्लहा सुयणा ॥ २८ ॥
सव्वस्स एइ पयई पियम्मि उप्पाइए पियं काउं ।
सुयणस्स एइ पयई अकए वि पिए पियं काउं ॥ २९ ॥
फरुसं न भणसि भणिओ वि हससि हसिऊण जम्पसि पियाइं ।
सज्जण तुज्झ सहावो न-याणिमो कस्स सारिच्छो ॥ ४० ॥

प्राकृतकाव्याय नमः प्राकृतकाव्यं च निर्मितं येन ।
तेभ्य एव प्रणमामः पठितुं च ये विजानन्ति ॥ ३१ ॥

सज्जनपद्धतिः ।

मथने शशी मथने सुरतरुर्मथनसम्भवा लक्ष्मीः ।
सुजनः पुनः कथय मम न जानीमः क सम्भूतः ॥ ३२ ॥
सुजनः शुद्धस्वभावो मलिनीक्रियमाणोऽपि दुर्जनजनेन ।
चारेण दर्पण इवाधिकतरं निर्मलो भवति ॥ ३३ ॥
सुजनो न कुप्यत्येवाथ कुप्यति पापं न चिन्तयति ।
अथ चिन्तयति न जल्पत्यथ जल्पति लज्जितो भवति ॥ ३४ ॥
दृढरोषकलुषितस्यापि सुजनस्य मुखाद् विप्रियं कुतः ।
राहुमुखेऽपि शशिनः किरणा अमृतमेव मुञ्चन्ति ॥ ३५ ॥
दृष्टा हरन्ति दुःखं जल्पन्तो ददति सकलसौख्यानि ।
एतद्विधिना सुकृतं सुजना यन्निर्मिता भुवने ॥ ३६ ॥
न हसन्ति परं न स्तुवन्त्यात्मानं प्रियशतानि जल्पन्ति ।
एष सुजनस्वभावो नमो नमस्तेभ्यः पुरुषेभ्यः ॥ ३७ ॥
अकृतेऽपि कृतेऽपि प्रिये प्रियं कुर्वन्तो जगति दृश्यन्ते ।
कृतविप्रियेऽपि खलु प्रियं कुर्वन्ति ते दुर्लभाः सुजनाः ॥ ३८ ॥
सर्वस्यैषा प्रकृतिः प्रिय उत्पादिते प्रियं कर्तुं ।
सुजनस्यैषा प्रकृतिरकृतेऽपि प्रिये प्रियं कर्तुं ॥ ३९ ॥
परुषं न भणसि भणितोऽपि हससि हसित्वा जल्पसि प्रियाणि ।
सज्जन तव स्वभावो न जानीमः कस्य सदृक्षः ॥ ४० ॥

नेच्छसि परयवयारं   परउवयारं च निच्चमावहसि।
अवराहेहि न कुप्पसि   सुयण नमो तुह सुहावस्स॥ ४१॥
दोहिं चिय पज्जत्तं   बहुएहि वि किं गुणेहि सुयणस्स।
विज्जुप्फुरिओ रोसो   मित्ती पाहाणरेह व्व॥ ४२॥
रे रे कलिकालमहा — गइन्दगलगज्जियस्स को कालो।
अज्ज वि सुपुरिसकेसरि — किसोरचलणङ्किया पुहवी॥ ४३॥
दीणं अब्भुद्धरिउं   पत्ते सरणागए पियं काउं।
अवरद्धेसु वि खमिउं   सुयणो च्चिय नवरि जाणेइ॥ ४४॥
बे पुरिसा धरइ धरा   अहवा दोहिं पि धारिया धरणी।
उवयारे जस्स मई   उवयरियं जो न पम्हुसइ॥ ४५॥
पडिवज्जन्ति न सुयणा   अह पडिवज्जन्ति कहवि दुक्खेहिं।
पत्थररेह व्व समा   मरणे वि न अन्नहा होइ॥ ४६॥
सेला चलन्ति पलए   मज्जायं सायरा वि मेल्लन्ति।
सुयणा तहिं पि काले   पडिवन्नं नेय सिढिलन्ति॥ ४७॥
चन्दणतरु व्व सुयणा   फलरहिया जइ वि निम्मिया विहिणा।
तह वि कुणन्ति परत्थं   नियसरीरेण लोयस्स॥ ४८॥

दुज्जणवज्जा।

हयदुज्जणस्स वयणं   निरन्तरं बहलकज्जलच्छायं।
संकुद्धं भिउडिजुयं   कयावि न हु निम्मलं दिट्ठं॥ ४९॥
थद्धो वङ्कग्गीवो   अवच्छिओ विसमदिट्ठिदुप्पेच्छो।
अहिणवरिद्धि व्व खलो   सुलाहिसु व्व पडिहाइ॥ ५०॥

नेच्छसि परापकारं परोपकारं च नित्यमावहसि।
अपराधेन कुप्यसि सुजन नमस्तव स्वभावाय॥ ४१॥
द्वाभ्यामेव पर्याप्तं बहुभिर्गुणैरपि किं सुजनस्य।
विद्युत्स्फुरितो रोषो मैत्री पाषाणरेखेव॥ ४२॥
रे रे कश्चित्कालमहागजेन्द्रगलगर्जितस्य कः कालः।
अद्यापि सुपुरुषकेसरिकिशोरचरणाङ्किता पृथ्वी॥ ४३॥
दीनमभ्युद्धर्तुं प्राप्ते शरणागते प्रियं कर्तुं।
अपराद्धेष्वपि क्षमितुं सुजन एव केवलं जानाति॥ ४४॥
द्वौ पुरुषौ धरतु धराथवा द्वाभ्यामपि धारिता धरणी।
उपकारे यस्य मतिर्यश्चोपकृतं न विस्मरति॥ ४५॥
प्रतिपद्यन्ते न सुजना अथ प्रतिपद्यन्ते कथमपि दुःखैः।
प्रस्तररेखेव समा मरणेऽपि नान्यथा भवति॥ ४६॥
शैलाश्चलन्ति प्रलये मर्यादां सागरा अपि मुञ्चन्ति।
सुजनास्तस्मिन्नपि काले प्रतिपन्नं नैव शिथिलयन्ति॥ ४७॥
चन्दनतरुरिव सुजनाः फलरहिता यद्यपि निर्मिता विधिना।
तथापि कुर्वन्ति परार्थं निजकशरीरेण लोके॥ ४८॥

दुर्जनपद्धतिः।

हतदुर्जनस्य वदनं निरन्तरं बहलकज्जलच्छायं।
संकुद्धं भ्रुकुटियुतं कदापि न खलु निर्मलं दृष्टं॥ ४९॥
स्तब्धो वक्रग्रीवोऽवाञ्छितो विषमदृष्टिदुःप्रेक्ष्यः।
अभिनवर्द्धिरिव खलः शूलाभिन्न इव प्रतिभाति॥ ५०॥

मइमासभेयजणणो दुम्मुहश्रो श्रत्थिखण्डणसमत्थो।
तह वि हु मज्झावलिश्रो नमइ खलो नहरणसरिच्छो॥ ५१॥
श्रकुलीणो दोमुहश्रो ता मङ्गरो भोयणं मुहे जाव।
मुरउ व्व खलो जिम्मि भोयणे विरसमारसइ॥ ५२॥
निद्धम्मो गुणरहिश्रो ठाणविमुक्को य लोहसंभूश्रो।
विन्धइ जणस्स हिययं पिसुणो बाणु व्व लग्गन्तो॥ ५३॥
जम्मे वि जं न हूयं न हु होसइ जं च जम्मलक्खे वि।
तं जम्पन्ति तह च्चिय पिसुणा जह होइ सारिच्छं॥ ५४॥
गुणिणो गुणेहि विहवेहि विहविणो होन्तु गव्विया नाम।
दोसेहि नवरि गव्वो खलाण मग्गो च्चिय श्रउव्वो॥ ५५॥
सन्तं न देन्ति वारन्ति देन्तयं दिन्नयं पि हारन्ति।
श्रणिमित्तवइरियाणं खलाण मग्गो च्चिय श्रउव्वो॥ ५६॥
परविवरलद्धलक्खे चित्तलिए भीसणे जमलजीहे।
वङ्कपरिसक्किरे गोणसे व्व पिसुणे मुहं कत्तो॥ ५७॥
श्रसमत्थमन्ततन्ताण कुलविमुक्काण भोयहीणाणं।
दिट्ठाण को न बीहइ विन्तरसप्पाण व खलाणं॥ ५८॥
एयं चिय बहुलाहो जीविज्जइ जं खलाण मज्झम्मि।
लाहो जं न डसिज्जइ भुयङ्गपरिवेढिए चलणे॥ ५९॥
न सहइ श्रब्भत्थणियं श्रसइ गयाणं पि पिट्ठिमंसाइं।
दट्ठूण भासुरमुहं खलसीहं को न बीहेइ॥ ६०॥
मा वच्चह वीसम्भं पसुहे बहुकूडकवडभरियाणं।
निव्वत्तियकज्जपरम्मुहाण सुणयाण व खलाणं॥ ६१॥

नखमांसभेदजननो दुर्मुखोऽस्थिखण्डनसमर्थः (अस्थि०)।
तथापि खलु चित्तवक्रो (मध्यावलितो) नमत खलो नखिसदृचः॥ ५१॥
अकुलीनो द्विमुखस्तावन्मधुरो भोजनं मुखे यावत्।
मुरज इव खलो जीर्णे भोजने विरसमारसति॥ ५२॥
निर्धर्मो गुणरहितः स्थाणविमुक्तश्च लोभसंभूतः (लोह०)।
विध्यति जनस्य हृदयं पिशुनो बाण इव लगन्॥ ५३॥
जन्मन्यपि यन्न भूतं न खलु भविष्यति यच्च जन्मलचेऽपि।
तज्जल्पन्ति तथैव पिशुना यथा भवति सदृचं॥ ५४॥
गुणिनो गुणैर्विभवैर्विभविनो भवन्तु गर्विता नाम।
दोषैर्नवरं गर्वः खलानां मार्ग एवापूर्वः॥ ५५॥
सन्न ददाति वारयन्ति ददतं दत्तमपि हारयन्ति।
अनिमित्तवैरिणां खलानां मार्ग एवापूर्वः॥ ५६॥
परविवरलब्धलक्षे नानाचित्ते (चित्रले) भीषणे यमलजिह्वे।
वक्रगमनशीले गोनस इव पिशुने सुखं कुतः॥ ५७॥
असमर्थमन्त्रतन्त्रेभ्यः कुलविमुक्तेभ्यो भोगहीनेभ्यः।
दुष्टेभ्यः को न बिभेति व्यन्तरसर्पेभ्य इव खलेभ्यः॥ ५८॥
एतदेव बहुलाभो जीव्यते यत्खलानां मध्ये।
लाभो यन्न दृश्यते भुजङ्गपरिवेष्टिते चरणे॥ ५९॥ [पृष्ठमांसानि।
न सहतेऽभ्यर्थनं (अभ्रस्तनितं) अश्नाति गतानामपि (गजानामपि)
दृष्ट्वा भासुरमुखं खलसिंहं को न बिभेति॥ ६०॥
मा व्रजत विश्रम्भं प्रमुखे बहुकूटकपटभृतानां।
निर्वर्तितकार्यपराङ्मुखानां शुनकानामिव खलानां॥ ६१॥

जेहिं चिय उब्भविया जाण पसाएण निग्गयपयावा ।
समरा डहन्ति विज्झं खलाण मग्गो च्चिय अउव्वो ॥ ६२ ॥
सरसा वि दुमा दावाणलेण डज्झन्ति सुक्खसंवलिया ।
दुज्जणसङ्गे पत्ते सुयणो वि सुहं न पावेइ ॥ ६३ ॥
खलसज्जणाण दोसा गुणा य को वण्णिउं तरइ लोए ।
जइ नवरि नायराओ दोहिं जीहासहस्सेहिं ॥ ६४ ॥

मित्तवज्जा ।

एक्कं चिय सलहिज्जइ दिणेसदियहाण नवरि निव्वहणं ।
आ जम्म एक्कमेक्केहि जेहि विरहो च्चिय न दिट्ठो ॥ ६५ ॥
पडिवन्नं दिणयरवासराण दोण्हं अखण्डियं सुहइ ।
सूरो न दिणेण विणा दिणो वि न हु सूरविरहम्मि ॥ ६६ ॥
मित्तं पयतोयसमं सारिच्छं जं न होइ किं तेण ।
अहियाएइ मिलन्तं आवइ आवट्टए पढमं ॥ ६७ ॥
तं मित्त कायव्वं जं किर वसणम्मि देसकालम्मि ।
आलिहियभित्तिवाउल्लयं व न परम्मुहं ठाइ ॥ ६८ ॥
तं मित्तं कायव्वं जं मित्तं कालकम्बलीसरिसं ।
उययण धोयमाणं सहावरङ्गं न मेल्लेइ ॥ ६९ ॥
सगुणाण निग्गुणाण य गरुया पालन्ति जं जि पडिवन्नं ।
पेच्छइ वसहेण समं हरेण वोलाविओ अप्पा ॥ ७० ॥
छिज्जउ सीसं अह होउ बन्धणं चयउ सव्वहा लच्छी ।
पडिवन्नपालणे सुपुरिसाण जं होइ तं होउ ॥ ७१ ॥

यैरेवोच्छ्रीकृता येषां प्रसादेन निर्गतप्रतापाः।
शबरा दहन्ति विन्ध्यं खलानां मार्ग एवापूर्वः॥ ६२॥
सरसा अपि द्रुमा दावानलेन दह्यन्ते शुष्कसंवलिताः।
दुर्जनसङ्गे प्राप्ते सुजनोऽपि सुखं न प्राप्नोति॥ ६३॥
खलसुजनयोर्दोषान् गुणांश्च को वर्णयितुं तरति लोके।
यदि नवरं नागराजो द्वाभ्यां जिह्वासहस्राभ्यां॥ ६४॥

मित्रपद्धतिः।

एकमेव श्लाघ्यते दिनेशदिवसयोर्निर्वहणं।
आ जन्म एकैकाभ्यां याभ्यां विरह एव न दृष्टः॥ ६५॥
प्रतिपन्नं दिनकरवासरयोर्द्वयोरखण्डितं शोभते।
सूर्यो न दिनेन विना दिनमपि न खलु सूर्यविरहे॥ ६६॥
मित्रं पयस्तोयसमं सदृशं यन्न भवति किं तेन।
अधिकायते मिलद्दाघात्यावर्तं प्रथमं॥ ६७॥
तन्मित्रं कर्तव्यं यत्किल व्यसने देशे काले च।
आलिखितभित्तिपुत्रक इव न पराङ्मुखं तिष्ठति॥ ६८॥
तन्मित्रं कर्तव्यं यन्मित्रं कालकम्बलीसदृशं।
उदकेन धाव्यमानं स्वभावरङ्गं न मुञ्चति॥ ६९॥
सगुणानां निर्गुणानां च गुरवः पालयन्ति यदेव प्रतिपन्नं।
प्रेक्षत वृषभेण समं हरेणातिक्रामित आत्मा॥ ७०॥
छिद्यतां शीर्षमथ भवतु बन्धनं त्यजतु सर्वथा लक्ष्मीः।
प्रतिपन्नपालने सुपुरुषाणां यद्भवति तद्भवतु॥ ७१॥

दिढलोहसङ्कलाणं अन्नाण वि विविहपासबन्धाणं ।
ताणं चिय अहिययरं वायाबन्धं कुलीणस्स ॥ ७२ ॥

नेहवज्जा ।

चन्दो धवलिज्जइ पुण्णिमाए अह पण्णिमा वि चन्देण ।
समसुहदुक्खाइ मणे पुन्नेण विणा न लब्भन्ति ॥ ७३ ॥
एक्काए नवरि नेहो पयासिओ तिहुयणम्मि जोण्हाए ।
जा झिज्जइ झीणे ससहरम्मि वड्ढेइ वड्ढन्ते ॥ ७४ ॥
झिज्जइ झीणम्मि सया वड्ढइ वड्ढन्तयम्मि सविसेसं ।
सायरससीण छज्जइ जयम्मि पडिवन्ननिव्वहणं ॥ ७५ ॥
पडिवन्नं जेण समं पुव्वनिओएण होइ जीवस्स ।
दूरट्ठिओ न दूरे जह चन्दो कुमुयसण्डाणं ॥ ७६ ॥
दूरट्ठिया न दूरं सज्जणचित्ताण पुव्वमिलियाणं ।
गयणट्ठिओ वि चन्दो आसासइ कुमुयसण्डाइं ॥ ७७ ॥
दिट्ठे वि छ होइ सुहं जइ वि न पावन्ति अङ्गसङ्गाइं ।
दूरट्ठिओ वि चन्दो सुणिव्वुइं कुणइ कुमुयाणं ॥ ७८ ॥
एमेव कहवि कस्स वि केण वि दिट्ठेण होइ परिओसो ।
कमलायराण रइणा किं कज्जं जेण वियसन्ति ॥ ७९ ॥
कत्तो उग्गमइ रवी कत्तो वियसन्ति पङ्कयवणाइं ।
सुयणाण जत्थ नेहो न चलइ दूरट्ठियाणं पि ॥ ८० ॥

दृढलोहशृङ्खलेभ्योऽन्येभ्योऽपि विविधपाशबन्धेभ्यः ।
तेभ्य एवाधिकतरं वाग्बन्धनं कुलीनस्य ॥ ७२ ॥

स्नेहपद्धतिः ।

चन्द्रो धवलीक्रियते पूर्णिमयाथ पूर्णिमापि चन्द्रेण ।
समसुखदुःखानि मन्ये पुण्येन विना न लभ्यन्ते ॥ ७३ ॥
एकया नवरं स्नेहः प्रकाशितस्त्रिभुवने ज्योत्स्नया ।
या क्षीयते क्षीणे शशधरे वर्धते वर्धमाने ॥ ७४ ।
क्षीयते क्षीणे सदा वर्धते वर्धमाने सविशेषं ।
सागरशशिनो राजते जगति प्रतिपन्ननिर्वहणं ॥ ७५ ॥
प्रतिपन्नं येन समं पूर्वनियोगेन भवति जीवस्य ।
दूरस्थितो न दूरे यथा चन्द्रः कुमुदषण्डानां ॥ ७६ ॥
दूरस्थिता न दूरं सज्जनचित्तानां पूर्वमिलितानां ।
गगनस्थितोऽपि चन्द्र आश्वास्ते कुमुदषण्डानि ॥ ७७ ॥
दृष्टेऽपि खलु भवति सुखं यद्यपि न प्राप्नुवन्त्यङ्गसङ्गान् ।
दूरस्थितोऽपि चन्द्रः सुष्ठु निर्वृतिं करोति कुमुदानां ॥ ७८ ॥
एवमेव कथमपि कस्यापि केनापि दृष्टेन भवति परितोषः ।
कमलाकराणां रविणा किं कार्यं येन विकसन्ति ॥ ७९ ॥
कुत उद्गच्छति रविः कुतो विकसन्ति पङ्कजवनानि ।
सुजनानां यत्र स्नेहो न चलति दूरस्थितानामपि ॥ ८० ॥

नीइवज्जा ।

जं अस्स मम्मभेयं चालिज्जन्तं च दूमए हिययं ।
तं तस्स कसणकडुयं कुलेसु जाया न जम्पन्ति ॥ ८१ ॥
सन्तेहि असन्तेहि य परस्स किं जम्पिएहि दोसेहिं ।
अत्थो जसो न लब्भइ सो वि अमित्तो कओ होइ ॥ ८२ ॥
अप्पहियं कायव्वं जइ सक्कइ परहियं च कायव्वं ।
अप्पहियपरहियाणं अप्पहियं चेव कायव्वं ॥ ८३ ॥
पुरिसे सच्चसमिद्धे अलियपमुक्के सहावसंतुट्ठे ।
तवधम्मनियमसहिए विसमा वि दसा समा होइ ॥ ८४ ॥
सीलं वरं कुलाओ दालिद्दं भव्वयं च रोगाओ ।
विज्जा रज्जाउ वरं खमा वरं सुट्ठु वि तवाओ ॥ ८५ ॥
सीलं वरं कुलाओ कुलेण किं होइ विगयसीलेण ।
कमलाइ कद्दमे संभवन्ति न हु हुन्ति मलिणाइं ॥ ८६ ॥
जं जि खमेइ समत्थो धणवन्तो जं न गव्वमुव्वहइ ।
जं च सविज्जो नमिरो तिसु तेसु अलङ्किया पुहवी ॥ ८७ ॥
छन्दं जो अणुवट्टइ मम्मं रक्खइ गुणे पयासेइ ।
सो नवरि माणुसाणं देवाण वि वल्लहो होइ ॥ ८८ ॥
कणवज्जिएण वरिसो नासइ दिवसो कुभोयणे भुत्ते ।
कुकलत्तेण य जम्मो नासइ धम्मो अधम्मेण ॥ ८९ ॥
कम्मं धम्मं पयडं च पोरिसं परकलत्तवज्जणयं ।
गञ्जणरहिओ जम्मो राढाइत्ताण संपडइ ॥ ९० ॥

नीतिपद्धतिः।

यद्यस्य मर्मभेदं भाष्यमानं च दूयते हृदयं।
तत्तस्य कर्णकटु कुलेषु जाता न जल्पन्ति॥ ८१॥
सद्भिरसद्भिश्च परस्य किं जल्पितैर्दोषैः।
अर्थो यशो न लभ्यते स चामित्रीकृतो भवति॥ ८२॥
आत्महितं कर्तव्यं यदि शक्यते परहितं च कर्तव्यं।
आत्महितपरहितयोरात्महितं चैव कर्तव्यं॥ ८३॥
पुरुषे सत्यसमृद्धेऽलीकप्रमुक्ते स्वभावसंतुष्टे।
तपोधर्मनियममये विषमापि दशा समा भवति॥ ८४॥
शीलं वरं कुलाद्दारिद्र्यं भव्यं च रोगात्।
विद्या राज्याद्वरं क्षमा वरं सुष्ठ्वपि तपसः॥ ८५॥
शीलं वरं कुलात्कुलेन किं भवति विगतशीलेन।
कमलानि कर्दमे संभवन्ति न खलु भवन्ति मलिनानि॥ ८६॥
यदेव क्षम्यति समर्थो धनवान्यद्गर्वं नोद्वहते।
यच्च सविद्यो नम्रस्त्रिभिरेभिरलङ्कृता पृथ्वी॥ ८७॥
छन्दं योऽनुवर्तते मर्म रक्षति गुणान् प्रकाशयति।
स केवलं मानुषाणां देवानामपि वल्लभो भवति॥ ८८॥
क्षणवञ्चनेन वर्षो नश्यति दिवसः कुभोजने भुक्ते।
कुकलत्रेण च जन्म नश्यति धर्मोऽधर्मेण॥ ८९॥
छद्मं धर्मं प्रकटं च पौरुषं परकलत्रवञ्चनं।
कलङ्करहितं जन्म भव्यात्मनां संपद्यते॥ ९०॥

धीरवज्जा ।

अप्पाणं अमुयन्ता जे आरम्भन्ति दुग्गमं कज्जं ।
परमुहपलोइयाणं ताणं कह होइ जयलच्छी ॥ ९१ ॥
सिग्घं आरुह कज्जं पारद्धं मा कहिं पि सिढिलेसु ।
पारद्धसिढिलियाइं कज्जाइ पुणो न सिज्झन्ति ॥ ९२ ॥
अच्छउ ता इयरजणो अङ्गे च्चिय जाइ पच्चभूयाइं ।
ताइं चिय लज्जिज्जइ पारद्धं परिहरन्तेण ॥ ९३ ॥
खीणविहवो वि सुयणो सेवइ रण्णं न पत्थए अन्नं ।
मरणे वि अइमहग्घं न विक्किणइ माणमाणिक्कं ॥ ९४ ॥
बे मग्गा भुवणयले माणिणि माणुन्नयाण पुरिसाणं ।
अहवा पावन्ति सिरिं अहव भमन्ता समप्पन्ति ॥ ९५ ॥
बेण्णि वि हुन्ति गईओ साहसवन्ताण धीरपुरिसाणं ।
वेल्लहलकमलहत्था रायसिरी अहव पव्वज्जा ॥ ९६ ॥
अहवा मरन्ति गुरुवसणपेल्लिया खण्डिऊण नियजीहं ।
नो गन्तूण खलाणं चवन्ति दीणक्खरं धीरा ॥ ९७ ॥
अह सुप्पइ पियमालिङ्गिऊण उत्तुङ्गथोरथणवट्टे ।
अह नरकरङ्ककङ्कालसङ्कुले भीसणमसाणे ॥ ९८ ॥
अह भुञ्जइ सह पियकामिणीहि कच्चोलथालसिप्पीहिं ।
अहवा विमलकवाले भिक्खं भमिऊण पेयवणे ॥ ९९ ॥
नमिऊण जं विढप्पइ खलचलणं तिहुयणं पि किं तेण ।
माणेण जं विढप्पइ तणं पि तं निव्वुइं कुणइ ॥ १०० ॥

धीरपद्धतिः।

आत्मानममुञ्चन्तो य आरभ्यन्ते दुर्गमं कार्यं।
परमुखावलोकिनां तेषां कथं भवति जयलक्ष्मीः ॥ ९१ ॥
शीघ्रमारुह कार्यं प्रारब्धं मा कथमपि शिथिलय।
प्रारब्धशिथिलितानि कार्याणि पुनर्न सिध्यन्ति ॥ ९२ ॥
आस्तां तावदितरजनोऽङ्ग एव यानि पञ्चभूतानि।
तेभ्य एव लज्यते प्रारब्धं परिहरता ॥ ९३ ॥
क्षीणविभवोऽपि सुजनः सेवतेऽरण्यं न प्रार्थयतेऽन्यं।
मरणेऽप्यतिमहार्घं न विक्रीणाति मानमाणिक्यं ॥ ९४ ॥
द्वौ मार्गौ भुवनतले मानिनि मानोन्नतानां पुरुषाणां।
अथवा प्राप्नुवन्ति श्रियमथवा भ्रमन्तः समाप्यन्ते ॥ ९५ ॥
द्वेऽपि भवतो गती साहसवतां धीरपुरुषाणां।
कोमलकमलहस्ता राजश्रीरथवा प्रव्रज्या ॥ ९६ ॥
अथवा म्रियन्ते गुरुव्यसनक्षिप्ताः खण्डयित्वा निजजिह्वां।
नो गत्वा खलानां जल्पन्ति दीनाक्षरं धीराः ॥ ९७ ॥
अथ सुप्यते प्रियामालिङ्ग्य उत्तुङ्गपृथुस्तनपृष्ठे।
अथ नरकरङ्ककङ्कालसङ्कुले भीषणश्मशाने ॥ ९८ ॥
अथ भुङ्क्ते सह प्रियकामिनीभिः कच्चोलस्थालशुक्तिभिः।
अथवा विमलकपाले भिक्षां भ्रान्त्वा प्रेतवने ॥ ९९ ॥
नत्वा यदर्ज्यते खलचरणांस्त्रिभुवनमपि किं तेन।
मानेन यदर्ज्यते तृणमपि तन्निर्वृतिं करोति ॥ १०० ॥

ते धन्ना ताण नमो ते गरुया माणिणो थिरारम्भा ।
जे गरुयवसणपडिपेल्लिया वि अन्नं न पत्थन्ति ॥ १ ० १ ॥
तुङ्गो च्चिय होइ मणो मणंसिणो अन्तिमासु वि दसासु ।
अत्थन्तस्स वि रविणो किरणा उद्धं चिय फुरन्ति ॥ १ ० २ ॥
ता तुङ्गो मेरुगिरी मयरहरो ताव होइ दुत्तारो ।
ता विसमा कज्जगई जाव न धीरा पवज्जन्ति ॥ १ ० ३ ॥
ता वित्थिण्णं गयणं ताव च्चिय जलहरा अइगहीरा ।
ता गरुया कुलसेला जाव न धीरेहि तुल्लन्ति ॥ १ ० ४ ॥
मेरुं तिणं व सग्गं घरङ्गणं हत्थछित्तं गयणयलं ।
वाहलियाइ समुद्दा साहसवन्ताण पुरिसाणं ॥ १ ० ५ ॥
संघडियघडियविघडिय — घडन्तविघडन्तसंघडिज्जन्तं ।
अवहत्थिऊण दिव्वं करेइ धीरो समारद्धं ॥ १ ० ६ ॥

साहसवज्जा ।

साहसमवलम्बन्तो पावइ हिययट्ठियं न सन्देहो ।
जेणुत्तमङ्गमेत्तेण राहुणा कवलिओ चन्दो ॥ १ ० ७ ॥
तं किं पि साहसं साहसेण साहन्ति साहससहावा ।
जं भविऊण दिव्वो परम्मुहो धुणइ नियसीसं ॥ १ ० ८ ॥
थरहरइ धरा खुब्भन्ति सायरा होइ विम्हलो दइवो ।
असमववसायसाहस — संलद्धजसाण धीराणं ॥ १ ० ९ ॥
अगणियसमविसमाणं साहसतुङ्गे समारुहन्ताणं ।
रक्खइ धीराण मणं आसन्नभयाउलो दइवो ॥ १ १ ० ॥

ते धन्यास्तेभ्यो नमस्ते गुरवो मानिनः स्थिरारम्भाः ।
ये गुरुव्यसनप्रतिप्रेरिता अप्यन्यं न प्रार्थयन्ते ॥ १०१ ॥
तुङ्गमेव भवति मनो मनस्विनोऽन्तिमास्वपि दशासु ।
अस्तमयमानस्यापि रवेः किरणा ऊर्ध्वमेव स्फुरन्ति ॥ १०२ ॥
तावत्तुङ्गो मेरुगिरिर्मकरगृहं तावद्भवति दुस्तारं ।
तावद्विषमा कार्यगतिर्यावन्न धीराः प्रपद्यन्ते ॥ १०३ ॥
तावद्विस्तीर्णं गगनं तावदेव जलधरा अतिगम्भीराः ।
तावद्गुरुकाः कुलशैला यावन्न धीरैस्तुल्यन्ते ॥ १०४ ॥
मेरुस्तृणमिव स्वर्गो गृहाङ्गणं हस्तस्पृष्टं गगनतलं ।
क्षुद्रनद्यः समुद्राः साहसवतां पुरुषाणां ॥ १०५ ॥
संघटितघटितविघटितघटमानविघटमानसंघट्यमानं ।
अपहस्त्य दैवं करोति धीरः समारब्धं ॥ १०६ ॥

साहसपद्धतिः ।

साहसमवलम्बमानः प्राप्नोति हृदयेप्सितं न सन्देहः ।
येनोत्तमाङ्गमात्रेण राहुणा कवलितश्चन्द्रः ॥ १०७ ॥
तत्किमपि साहसं साहसेन साधयन्ति साहसस्वभावाः ।
यद्भावयित्वा दैवं पराङ्मुखं धूनयति निजशिरः ॥ १०८ ॥
कम्पते धरा क्षुभ्यन्ति सागरा भवति विह्वलं दैवं ।
असमव्यवसायसाहससंलब्धयशसेभ्यो धीरेभ्यः ॥ १०९ ॥
अगणितसमविषमाणां साहसतुङ्गे समारोहतां ।
रक्षति धीराणां मन आसन्नभयाकुलं दैवं ॥ ११० ॥

तं किं पि कम्मरयणं धीरा ववसन्ति साहसवसेणं ।
जं बम्भहरिहराण वि लग्गइ चित्ते चमक्कारो ॥ १ १ १ ॥
धीरेण समं समसीसियाए रे दिव्व आरुहन्तस्स ।
होहिइ किं पि कलङ्कं धुव्वन्तं जं न फिट्टिहिइ ॥ १ १ २ ॥
जह जह न समप्पइ विहि — वसेण विहडन्तकज्जपरिणामो ।
तह तह धीराण मणे वड्डइ बिउणो समुच्छाहो ॥ १ १ ३ ॥
फलसंपत्तीए समोणयाइ तुङ्गाइ फलविपत्तीए ।
हिययाइ सुपुरिसाणं महातरूणं व सिहराइं ॥ १ १ ४ ॥
हियए जाओ तत्थेव वड्डिओ नेय पयडिओ लोए ।
ववसायपायवो सुपुरिसाण लक्खिज्जइ फलेहिं ॥ १ १ ५ ॥
ववसायफलं विहवो विहवस्स य विहलजणसमुद्धरणं ।
विहलुद्धरणेण जसो जसेण भण किं न पज्जत्तं ॥ १ १ ६ ॥
आढत्ता सप्पुरिसेहि तुङ्गववसायदिन्नहियएहिं ।
कज्जारम्भा होहिन्ति निप्फला कह चिरं कालं ॥ १ १ ७ ॥
न महुमहणस्स वच्छे मज्झे कमलाण नेय खीरहरे ।
ववसायसायरे सुपुरिसाण लच्छी फुडं वसइ ॥ १ १ ८ ॥
तह्वियहारम्भवावडाणं मित्तेक्ककज्जरसियाणं ।
रविरहतुरयाण व सुपुरिसाण न हु हिययवीसामो ॥ १ १ ९ ॥

दिव्ववज्जा ।

अत्थो विज्जा पुरिसत्तणं च अन्नाइ गुणसहस्साइं ।
दिव्वायत्ते कज्जे सव्वाइ नरस्स विहडन्ति ॥ १ २ ० ॥

तत्किमपि कर्मरत्नं धीरा व्यवस्यन्ति साहसवशेन।
यद्ब्रह्महरिहराणामपि लगति चित्ते चमत्कारः॥ १११॥
धीरेण समं स्पर्धया रे दैवाहृतः।
भविष्यति कोऽपि कलङ्को धाव्यमानो यो न यास्यति॥ ११२॥
यथा यथा न समाप्यते विधिवशेन विघटमानकार्यपरिणामः।
तथा तथा धीराणां मनसि वर्धते द्विगुणः समुत्साहः॥ ११३॥
फलसंपत्त्या समवनतानि तुङ्गानि फलविपत्त्या।
हृदयानि सुपुरुषाणां महातरूणामिव शिखराणि॥ ११४॥
हृदये जातस्तत्रैव वर्धितो नैव प्रकटितो लोके।
व्यवसायपादपः सुपुरुषाणां लक्ष्यते फलैः॥ ११५॥
व्यवसायफलं विभवो विभवस्य च विकलजनसमुद्धरणं।
विकलोद्धरणेन यशो यशसा भण किं न पर्याप्तं॥ ११६॥
आरब्धाः सत्पुरुषैस्तुङ्गव्यवसायदत्तहृदयैः।
कार्यारम्भा भविष्यन्ति निष्फलाः कथं चिरं कालं॥ ११७॥
न मधुमथनस्य वक्षसि मध्ये कमलानां नैव क्षीरनिधौ।
व्यवसायसागरे सुपुरुषाणां लक्ष्मीः स्फुटं वसति॥ ११८॥
तद्दिवसारम्भव्यापृतानां सिद्धैककार्यरसिकानां।
रविरथतुरगाणामिव सुपुरुषाणां न खलु हृदयविश्रामः॥ ११९॥

दैवपद्धतिः।

अर्थो विद्या पौरुषत्वं चान्यानि गुणसहस्राणि।
दैवायत्ते कार्ये सर्वाणि नरस्य विघटन्ते॥ १२०॥

4

सत्थत्थे पडियस्स वि मज्झेणं एइ किंपि तं कज्जं।
जं न कहिउं न सहिउं न चेव पच्छाइउं तरइ ॥१२१॥
जइ विसइ विसमविवरे लङ्घइ उदहिं करेइ ववसायं।
तह वि हु फलं न पावइ पुरिसो दिव्वे पराहुत्ते ॥१२२॥
नग्घन्ति गुणा विहडन्ति बन्धवा वल्लहा विरज्जन्ति।
ववसाओ न समप्पइ नरस्स दिव्वे पराहुत्ते ॥१२३॥
जा जा डाला लम्बइ हत्थं गहिऊण वीसमइ जत्थ।
सा सा तडत्ति तुट्टइ नरस्स दिव्वे पराहुत्ते ॥१२४॥
जं नयणेहि न दीसइ हियएण वि जं न चिन्तियं कइवि।
तं तं सिरम्मि निवडइ नरस्स दिव्वे पराहुत्ते ॥१२५॥

विहिवज्जा।

खण्डिज्जइ विहिणा सस — हरो वि सूरस्स होइ अत्थमणं।
हा दिव्वपरिणईए कवलिज्जइ को न कालेणं ॥१२६॥
को एत्थ सया सुहिओ कस्स व लच्छीथिराइ पेम्माइं।
कस्स व न होइ खलणं भण को हु न खण्डिओ विहिणा ॥१२७॥
उन्नय नीया नीया वि उन्नया हुन्ति तक्खण चेव।
विहिपरिणामियकज्जं हरिहरबम्हा न याणन्ति ॥१२८॥
विहिणा जं चिय लिहियं नलाडवट्टीए तेण दइवेण।
पच्छा सो वि पसन्नो अन्नह करिउं न हु समत्थो ॥१२९॥
किं करइ किर वराओ साहसववसायमाणगरुओ वि।
पुरिसो भग्गपयावो विहिणा विवरीयरूवेण ॥१३०॥

स्वस्थार्थे पतितस्यापि मध्येनैति तत्किमपि कार्यं।
यन्न कथयितुं न सोढुं न चैव प्रच्छादयितुं शक्नोति ॥१२१॥
यदि विशति विषमविवरे लङ्घत्युदधिं कुरुते व्यवसायं।
तथापि खलु फलं न प्राप्नोति पुरुषो दैवे पराङ्मुखे ॥१२२॥
नार्घन्ति गुणा विघटन्ते बान्धवा वल्लभा विरज्यन्ते।
व्यवसायो न समाप्यते नरस्य दैवे पराङ्मुखे ॥१२३॥
यां यां शाखां लम्बते हस्तेन गृहीत्वा विश्राम्यति यस्यां।
सा सा तटेति च्युच्यति नरस्य दैवे पराङ्मुखे ॥१२४॥
यन्नयनाभ्यां न दृश्यते हृदयेनापि यन्न चिन्तितं कथमपि।
तत्तच्छिरसि निपतति नरस्य दैवे पराङ्मुखे ॥१२५॥

विधिपद्धतिः।

खण्ड्यते विधिना शशधरोऽपि सूर्यस्य भवत्यस्तमनं।
हा दैवपरिणत्या कवलीक्रियते को न कालेन ॥१२६॥
कोऽत्र सदा सुखितः कस्य वा लक्ष्मीः स्थिराणि प्रेमाणि।
कस्य वा न भवति स्खलनं भण कः खलु विधिना खण्डितः॥१२७॥
उन्नता नीचा नीचा अप्युन्नता भवन्ति तत्क्षणादेव।
विधिपरिणमितकार्यं हरिहरब्रह्माणो न जानन्ति ॥१२८॥
विधिना यदेव लिखितं ललाटपट्टे तेन दैवेन।
पश्चात्सोऽपि प्रसन्नोऽन्यथा कर्तुं न खलु समर्थः ॥१२९॥
किं करोति वराकः किल साहसव्यवसायमानगुरुरपि।
पुरुषो भग्नप्रतापो विधिना विपरीतक्रमेण ॥१३०॥

बेण्णि वि महणारम्भे पेच्छह जं पुव्वकम्मपरिणामो ।
उप्पज्जइ हरह विसं कण्हस्स घणत्थणा लच्छी ॥१२१॥
विहिविहियं चिय लब्भइ अमयं देवाण मज्झमहे लच्छी ।
रयणायरम्मि महिए हरस्स भाए विसं जायं ॥१२२॥

दीनवज्जा ।

परपत्थणापवन्नं मा जणणि जणेसु एरिसं पुत्तं ।
उयरे वि मा धरिज्जसु पत्थणभङ्गो कओ जेण ॥१२३॥
ता रूवं ताव गुणा लज्जा सच्चं कुलक्कमो ताव ।
ताव च्चिय अहिमाणो देहि त्ति न भण्णए जाव ॥१२४॥
तिणतूलं पि हु लहुयं दीणं दइवेण निम्मियं भुवणे ।
वाएण किं न नीयं अप्पाणं पत्थणभएण ॥१२५॥
थरथरथरेइ हिययं जीहा घोलेइ कण्ठमज्झम्मि ।
नासइ मुहलावण्णं देहि त्ति परं भणन्तस्स ॥१२६॥
किसिणिज्जन्ति लयन्ता उदहिजलं जलहरा पयत्तेण ।
धवलीहुन्ति हु देन्ता देन्तलयन्तन्तरं पेच्छ ॥१२७॥

दारिद्दवज्जा ।

दारिद्दय तुज्झ गुणा गोविज्जन्ता वि धीरपुरिसेहिं ।
पाहुणएसु छणेसु य वसणेसु य पायडा हुन्ति ॥१२८॥
दारिद्दय तुज्झ नमो जस्स पसाएण एरिसी रिद्धी ।
पेच्छामि सयललोए ते मह लोया न पेच्छन्ति ॥१२९॥

द्वावपि मथनारम्भे प्रेक्षत यत्पूर्वकर्मपरिणामः।
उत्पद्यते हरस्य विषं कृष्णस्य घनस्तना लक्ष्मीः॥१२१॥
विधिविहितमेव लभ्यतेऽमृतं देवानां मधुमथने लक्ष्मीः।
रत्नाकरे मथिते हरस्य भागे विषं जातं॥१२२॥

दीनपद्धतिः।

परप्रार्थनाप्रपन्नं मा जननि जनयस्वेदृशं पुत्रं।
उदरेऽपि मा ध्रियस्व येन प्रार्थनाभङ्गः कृतः॥१२३॥
तावद्रूपं तावद्गुणा लज्जा सत्यं कुलक्रमस्तावत्।
तावदेवाभिमानो देहीति न भण्यते यावत्॥१२४॥
तृणतूलमपि खलु लघु दीनं देवेन निर्मितं भुवने।
वातेन किं न नीतमात्मानं प्रार्थनाभयेन॥१२५॥
कम्पते हृदयं जिह्वा घूर्णते कण्ठमध्ये।
नश्यति मुखलावण्यं देहीति परं भणतः॥१२६॥
कृष्णीभवन्ति गृह्णन्त उदधिजलं जलधराः प्रयत्नेन।
धवलीभवन्ति खलु ददतो ददत्कृतदन्तारं प्रेक्ष॥१२७॥

दारिद्र्यपद्धतिः।

दारिद्र्य तव गुणा गोप्यमाना अपि धीरपुरुषैः।
प्राघूर्णेषु क्षणेषु च व्यसनेषु च प्रकटीभवन्ति॥१२८॥
दारिद्र्य तुभ्यं नमो यस्य प्रसादेनेदृश्यृद्धिः।
प्रेक्षामि सकललोकांस्ते मां लोका न प्रेक्षन्ति॥१२९॥

जे जे गुणिणो जे जे वि माणिणो जे वियड्ढसंमाणा ।
दालिद्द रे वियक्खण ताण तुमं साणुराओ सि ॥१४०॥
दीसन्ति जोयसिद्धा अञ्जणसिद्धा वि केवि दीसन्ति ।
दारिद्दजोयसिद्धं मं ते लोया न पेच्छन्ति ॥१४१॥
जे भग्गा विहवसमीरणेण वङ्कं ठवन्ति पयमग्गं ।
ते नूणं दालिद्दोसहेण जइ पञ्जलिज्जन्ति ॥१४२॥
किं वा कुलेण कीरइ किं वा विणएण किं व रूवेण ।
धणरहियाणं सुन्दरि नराण को आयरं कुणइ ॥१४३॥
जाई रूवं विज्जा तिन्नि वि गच्छन्तु कन्दरे विवरे ।
अत्थो च्चिय परिवड्ढउ जेण गुणा पायडा हुन्ति ॥१४४॥
धम्मत्थकामरहिया जे दियहा निद्धणाण वोलीणा ।
जइ ताइ गणेइ विही गणेउ न हु एरिसं जुत्तं ॥१४५॥
संकुयइ संकुयन्ते वियसइ वियसन्तयम्मि सूरम्मि ।
सिसिरे रोरकुडुम्बं पङ्कयलीलं समुव्वहइ ॥१४६॥

पहुवज्जा ।

छज्जइ पहुस्स ललियं पियाए माणो खमासमत्थस्स ।
जाणन्तस्स य भणियं मोणं च अयाणमाणस्स ॥१४७॥
सच्छन्दं बोलिज्जइ किज्जइ जं नियमणस्स पडिहाइ ।
अजसस्स न बीहिज्जइ पहुत्तणं तेण रमणिज्जं ॥१४८॥
जम्मदिणे थणनिवडण — भएण दिज्जन्ति धाइउच्छङ्गे ।
पहुणो जं नीयरया मन्ने तं खीरमाहप्पं ॥१४९॥

ये ये गुणिनो ये येऽपि मानिनो ये विदग्धसंमानाः।
दारिद्र्य रे विचक्षण तेषु त्वं सानुरागोऽसि ॥१४०॥
दृश्यन्ते योगसिद्धा अञ्जनसिद्धा अपि केचन दृश्यन्ते।
दारिद्र्ययोगसिद्धं मां ते लोका न प्रेक्षन्ते ॥१४१॥
ये भग्ना विभवसमीरणेन वक्रं स्थापयन्ति पदमार्गं।
ते नूनं दारिद्र्यौषधेन यदि प्राञ्जला भवन्ति ॥१४२॥
किं वा कुलेन क्रियते किं वा विनयेन किं वा रूपेण।
धनरहितानां सुन्दरि नराणां क आदरं करोति ॥१४३॥
जाती रूपं विद्या त्रीण्यपि गच्छन्तु कन्दरे विवरे।
अर्थ एव परिवर्धतां येन गुणाः प्रकटीभवन्ति ॥१४४॥
धर्मार्थकामरहिता ये दिवसा निर्धनानामतिक्रान्ताः।
यदि तान् गणयति विधिर्गणयतु न खल्वीदृशं युक्तं ॥१४५॥
संकुचति संकुचति विकसति विकसति सूर्ये।
शिशिरे दरिद्रकुटुम्बं पङ्कजलीलां समुद्वहति ॥१४६॥

प्रभुपद्धतिः।

राजते प्रभोर्ललितं प्रियाया मानः क्षमासमर्थस्य।
जानतश्च भणितं मौनं चाजानतः ॥१४७॥
स्वच्छन्दं कथ्यते क्रियते यन्निजमनसः प्रतिभाति।
अयशसो न भीयते प्रभुत्वं तेन रमणीयं ॥१४८॥
जन्मदिवसे स्तननिपतनभयेन दीयन्ते धात्र्युत्सङ्गे।
प्रभवो यन्नीचरता मन्ये तत्क्षीरमाहात्म्यं ॥१४९॥

छिट्ठट्ठे जडनिवहं तह य सुपत्ताइ उत्तमङ्गेसु ।
जह होइ तह्व तह जइ पङ्गणो ता किं न पज्जत्तं ॥१५०॥

सेवयवज्जा ।

जं सेवयाण दुक्खं चारित्तविवज्जियाण नरणाह ।
तं होउ तुह रिऊणं अहवा ताणं पि मा होउ ॥१५१॥
भूमीसयणं जरचीरबन्धणं बम्भचेरयं भिक्खा ।
मुणिचरियं दुग्गयसेवयाण धम्मो परं नत्थि ॥१५२॥
जइ नाम कहव मोक्खं होइ तुलग्गेण सेवयजणस्स ।
तं खवणयसग्गारोहणं व विग्गोवयमएहिं ॥१५३॥
ओलग्गिओ वि धम्मम्मि होज्ज एण्हिं नरिन्द वच्चामो ।
आलिहियकुञ्जरस्स व तुह पङ्क दाणं चिय न दिट्ठं ॥१५४॥
आसन्नफलो फणसो व्व नाह सयलस्स सेवयजणस्स ।
अन्नं पुण पत्थिव पत्थिओ वि तालो तुमं जाओ ॥१५५॥
फणसेण समं महिमण्डलम्मि का तरुवराण समसीसी ।
करिकुम्भसच्छहं मग्गणाण जो देइ फलनिवहं ॥१५६॥
वरिसिहिसि तुमं जलहर भरिहिसि भुवणन्तराइ नीसेसं ।
तण्हासुसियसरीरे मुयम्मि वप्पीहयकुडुम्बे ॥१५७॥
देहि त्ति कह नु भणइ सुपुरिसववहारबाहिरं वयणं ।
सेविज्जइ विणएणं एस च्चिय पत्थणा लोए ॥१५८॥
भुञ्जन्ति कमण्डसणा अब्भन्तरसंठिया गइन्दस्स ।
जे पुण विङ्करसहाया ते धवला बाहिर च्चेव ॥१५९॥

अधोऽधो जडनिवहं तथा च सुपत्राण्युत्तमाङ्गेषु।
यथा भवति तरुस्तथा यदि प्रभवस्तस्मात्किं न पर्याप्तं ॥१५०॥

सेवकपद्धतिः।

यत्सेवकानां दुःखं चारित्रविवर्जितानां नरनाथ।
तद्भवतु तव रिपूणामथवा तेषामपि मा भवतु ॥१५१॥
भूमौशयनं जरच्चीरबन्धनं ब्रह्मचर्यं भिक्षा।
मुनिचरितं दुर्गतसेवकानां धर्मः परं नास्ति ॥१५२॥
यदि नाम कथमिव सौख्यं भवति काकतालीयेन सेवकजनस्य।
तत्क्षपणकस्वर्गारोहणमिव व्याकुलभावगतैः ॥१५३॥
अवलग्नोऽसि धर्मे भूया इदानीं नरेन्द्र व्रजामः।
आलिखितकुञ्जरस्येव तव प्रभो दानमेव न दृष्टं ॥१५४॥
आसन्नफलो पनस इव नाथ सकलस्य सेवकजनस्य।
अस्माकं पुनः पार्थिव प्रार्थितोऽपि तालस्त्वं जातः ॥१५५॥
पनसेन समं महीमण्डले का तरुवराणां स्पर्धा।
करिकुम्भसदृक्षं मार्गणानां यो ददाति फलनिवहं ॥१५६॥
वर्षिष्यसि त्वं जलधर भरिष्यसि भुवनान्तराणि निःशेषं।
तृष्णाशोषितशरीरे मृते चातककुटुम्बे ॥१५७॥
देहीति कथं नु भण्यते सुपुरुषव्यवहारबहिर्भूतं वचनं।
सेव्यते विनयेनैषैव प्रार्थना लोके ॥१५८॥
भुञ्जते कृष्णदशना अभ्यन्तरसंस्थिता गजेन्द्रस्य।
ये पुनर्विधुरसहायास्ते धवला बहिरेव ॥१५९॥

तम्बाउ तिन्नि सुपओ — हगाउ चत्तारि पक्कलवइल्ला ।
निप्पन्ना रालयमञ्जरीउ सेवा सुहं कुणउ ॥ १६० ॥
सव्वो कुहिओ सोहइ मढदेउलमन्दिरं च चच्चरयं ।
नरणाह मह कुडुम्बं कुहकुहियं दुव्वलं होइ ॥ १६१ ॥

सुहडवज्जा

जं दिज्जइ पहरपरव्वसेहि मुच्छागएहि पयमेक्कं ।
तह नेहस्स पयस्स व न याणिमो को समब्भहिओ ॥ १६२ ॥
भग्गे वि बले वलिए वि साहणे सामिए निरुच्छाहे ।
नियभुयविक्कमसारा थक्कन्ति कुलुग्गया सुहडा ॥ १६३ ॥
वियलइ धणं न माणं झिज्जइ अङ्गं न झिज्जइ पयावो ।
रूवं न चलइ फुरणं सिविणे वि मणंसिसत्थाणं ॥ १६४ ॥
अवमाणिओ व्व संमाणिओ व्व नवसेवओ व्व कुविओ व्व ।
पहरइ कयावराहो व्व निब्भओ को वि सङ्गामे ॥ १६५ ॥
उयरे असिकप्परिए अन्तोहे निवडियम्मि चलणेसु ।
भमइ भडो जसलुद्धो ससङ्कलो मत्तहत्थि व्व ॥ १६६ ॥
दाहिणकरेण खग्गं वामेण सिरं धरेइ निवडन्तं ।
अन्तावेढियचलणो धाइ भडो एक्कमेक्कस्स ॥ १६७ ॥
अज्ज वि विझरो सुपहू अज्ज वि पहरन्ति सुहडसंघाया ।
अज्ज वि मज्झत्था जयसिरी वि ता जीव मा वच्च ॥ १६८ ॥
नेच्छइ सग्गग्गमणं कुवइ भडो सुरवहूहि निज्जन्तो ।
गहयपडिवक्खपेल्लिय — सामियकज्जे अणिव्वाए ॥ १६९ ॥

गावस्तिस्रः सुपयोधराश्चत्वारः समर्थवृषभाः ।
निष्पन्ना शालकमञ्चर्यः सेवा सुखं करोतु ॥ १६० ॥
सर्वोः (क्षुधितः) धवलितः शोभते मठदेवकुलमन्दिरं च चत्वरं ।
नरनाथ मम कुटुम्बं क्षुधितं दुर्बलं भवति ॥ १६१ ॥

सुभटपद्धतिः

यद्दीयते प्रहारपरवशैर्मूर्च्छागतैः पदमेकं ।
तथा स्नेहस्य पयसो वा न जानीमः किमभ्यधिकं ॥ १६२ ॥
भग्नेऽपि बले वलितेऽपि साधने स्वामिनि निरुत्साहे ।
निजभुजविक्रमसारास्तिष्ठन्ति कुलोद्गताः सुभटाः ॥ १६३ ॥
विगलति धनं न मानः क्षीयतेऽङ्गं न क्षीयते प्रतापः ।
रूपं न चलति स्फुरणं स्वप्नेऽपि मनस्विसार्थानां ॥ १६४ ॥
अपमानित इव संमानित इव नवसेवक इव कुपित इव ।
प्रहरति कृतापराध इव निर्भयः कोऽपि सङ्ग्रामे ॥ १६५ ॥
उदरेऽसिदारितेऽन्त्रौघे निपतिते चरणयोः ।
भ्रमति भटो यशोलुब्धः सशृङ्खलो मत्तहस्तीव ॥ १६६ ॥
दक्षिणकरेण खड्गं वामेन शिरो निपतद्धारयति ।
अन्त्रावेष्टितचरणो धावति भट एकैकस्य ॥ १६७ ॥
अद्यापि विधुरः सुप्रभुरद्यापि प्रहरन्ति सुभटसंघाताः ।
अद्यापि मध्यस्था जयश्रीरपि तस्माज्जीव मा व्रज ॥ १६८ ॥
नेच्छति स्वर्गगमनं कुप्यति भटः सुरवधूभिर्नीयमानः ।
गुरुकप्रतिपक्षक्षिप्तस्वामिकार्येऽनिर्मिते ॥ १६९ ॥

एक्को वि को वि नियगोत्तभूसणो धरउ जणणिउयरम्मि ।
जो रिउघडाण समुहो परम्मुहो परकलत्ताणं ॥ १७० ॥

वियडं सो परिसक्कउ सामिपसायं च सो समुव्वहउ ।
दुव्वारवेरिवारण – निवारणा जस्स भुयदण्डा ॥ १७१ ॥

एक्कं दन्तम्मि पयं बीयं कुम्भम्मि तइयमलहन्तो ।
बलिबन्धविलसियं मज्झ – महस्स आलम्बए सुहडो ॥ १७२ ॥

चलचमरकण्णचालिर – विज्जिज्जन्तो भडो गइन्देण ।
ओ सुवइ सामिकयकज्जनिब्भरो दन्तपलङ्के ॥ १७३ ॥

गाढासणस्स कस्स वि उयरे निहयस्स मण्डलग्गेण ।
अद्धं महीए पडियं तुरङ्गपिट्ठिट्ठियं अद्धं ॥ १७४ ॥

सब्भावे पङ्कहियए जीए सग्गे जसे जए सयले ।
ठविए रणम्मि सीसे कयकज्जो नच्चिओ सुहडो ॥ १७५ ॥

छिन्ने रणम्मि बहुपङ्कपसायमालापडिच्छिरे सीसे ।
उत्तिण्णगरुयभारं व नच्चियं नरवरकबन्धं ॥ १७६ ॥

पक्खाणिलेण पहुणो विरमउ मुच्छ त्ति पासपडिएण ।
गिद्धुत्तकड्ढणं दूसहं पि साहिज्जइ भडेण ॥ १७७ ॥

वच्छत्थलं च सुहडस्स रुहिरकुङ्कुमविलित्तयङ्गस्स ।
वरकामिणि व्व चुम्बइ उरे निसन्ना सिवा वयणं ॥ १७८ ॥

धवलवज्जा

संचुण्णियथोरजुयप्पहारसंजणियगरुयकिणसोहो ।
धवलस्स महाभरकड्ढणाइ कन्धो च्चिय कहेइ ॥ १७९ ॥

एकोऽपि कोऽपि निजगोत्रभूषणो म्रियते जनन्युदरे।
यो रिपुघटानां संमुखः पराङ्मुखः परकलत्रेभ्यः॥ १७० ॥
विकटं स परिक्रामतु स्वमिप्रसादं च स समुद्वहतु।
दुर्वारवैरिवारणनिवारणा यस्य भुजदण्डाः॥ १७१ ॥
एकं दन्ते पदं द्वितीयं कुम्भे तृतीयमलभमानः।
बलिबन्धविलसितं मधुमथ आलम्बते सुभटः॥ १७२ ॥
चलचमरचालनशीलकर्णवीज्यमानो भटो गजेन्द्रेण।
अहो स्वपिति स्वामिकृतकार्यनिर्भरो दन्तपल्यङ्के॥ १७३ ॥
गाढासनस्य कस्याप्युदरे निहतस्य मण्डलाग्रेण।
अर्धं मह्यां पतितं तुरङ्गपृष्ठस्थितमर्धं॥ १७४ ॥
सद्भावे प्रभुहृदये जीवे स्वर्गे यशसि सकले जगति।
स्थापिते रणे शिरसि कृतकार्यो नर्तितः सुभटः॥ १७५ ॥
छिन्ने रणे बहुप्रभुप्रसादमालाप्रतीच्छणशीले शिरसि।
उत्तीर्णगुरुकभारमिव नर्तितं नरवरकबन्धं॥ १७६ ॥
पक्षानिलेन प्रभोर्विरमतु मूर्छेति पार्श्वपतितेन।
गृध्रान्त्राकर्षणं दुःसहमपि सह्यते भटेन॥ १७७ ॥
वक्षःस्थलं च सुभटस्य रुधिरकुङ्कुमविलिप्ताङ्गस्य।
वरकामिनीव चुम्बत्युरसि निषण्णा शिवा वदनं॥ १७८ ॥

धवलपद्धतिः

संचूर्णितपृथुयुगप्रहारसंजनितगुरुककिणशोभः।
धवलस्य महाभरकर्षणानि स्कन्ध एव कथयति॥ १७९ ॥

अह मरइ धुरालग्गो संचुण्णियसन्धिबन्धणो धवलो ।
न हु पामरस्स विहुरे आरापरिघट्टणं सहइ ॥ १८० ॥
अह तोडइ नियकन्धं अह कड्ढइ गुरुभरम्मि दुव्वोज्झं ।
धवलो धुरम्मि जुत्तो न सहइ उच्चारियं हक्कं ॥ १८१ ॥
चिक्कणचिक्खल्लचहुट्टचक्कथक्के भरम्मि जाणिहिसि ।
अविसेसण्णय गहवइ परम्मुहो जं सि धवलाणं ॥ १८२ ॥
अमुणियगुणो न जुप्पइ न मुणिज्जइ स य गुणो अजुत्तस्स ।
थक्के भरे विसूरइ अउव्ववग्गं गओ धवलो ॥ १८३ ॥
सो च्चिय सयडे सो च्चिय हलम्मि सो च्चिय वहेइ पिट्ठीए ।
बहुगोधणो वि हलिओ नन्दइ एक्केण धवलेण ॥ १८४ ॥
कत्तो लब्भन्ति धुरंधराइ धवलाइ भरसमत्थाइं ।
अइविहुरे गुरुभारं कड्ढन्ति य लीलमत्ताए ॥ १८५ ॥

विञ्झवज्जा

दन्तक्खोहं तडवियडमोडणं सरसपल्लवुल्लिहणं ।
जइ विञ्झो च्चिय न सहइ ता करिणो कत्थ वच्चन्ति ॥ १८६ ॥
सा रेवा ताइं पाणियाइ ते च्चेव करिणिसंघाया ।
सा सल्लइ सल्लइ गय — वरस्स विञ्झं मुयन्तस्स ॥ १८७ ॥
विञ्झेण विणा वि गया नरवइभुवणेसु गोरविज्जन्ति ।
विञ्झो न होइ अगओ गएहि बहुएहि वि गएहिं ॥ १८८ ॥
गोमहिसतुरङ्गाणं पसूण सव्वाण जुज्जए ठाणं ।
दइगइन्दाण पुणो अह विञ्झो अह महाराओ ॥ १८९ ॥

अथ म्रियते धुरालग्नः संचूर्णितसन्धिबन्धनो धवलः।
न खलु पामरस्य विधुर आरापरिघट्टणं सहते॥ १८०॥
अथ त्रोटयति निजस्कन्धमथ कर्षति गुरुभरे दुर्वाह्यं।
धवलो धुरि युक्तो न सहत उच्चारितं प्रेरणं॥ १८१॥
चिक्कणचिखल्लमग्नचक्रस्थिते भरे त्वमस्यसि।
अविशेषज्ञ गृहपते पराङ्मुखो यदसि धवलेभ्यः॥१८२॥
अज्ञातगुणो न युज्यते न ज्ञायते स च गुणोऽयुक्तस्य।
स्थिते भरे खिद्यतेऽपूर्ववल्लां गतो धवलः॥ १८३॥
स एव शकटे स एव हले स एव वहति पृष्ठ्यां।
सकृगोधनोऽपि हालिको नन्दत्येकेन धवलेन॥ १८४॥
कुतो लभ्यते धुरंधरा धवला भरसमर्थाः।
अतिविधुरे गुरुभरं कर्षन्ति च लीलामात्रेण॥ १८५॥

विन्ध्यपद्धतिः

दन्तक्षोभं तटविकटमोटनं सरसपल्लवोल्लेखनं।
यदि विन्ध्य एव न सहते तदा करिणः कुतो व्रजन्ति॥ १८६॥
सा रेवा तानि पानीयानि त एव करिणीसंघाता.।
सा शल्लकी शल्यायते गजवरस्य विन्ध्यं मुञ्चतः॥ १८७॥
विन्ध्येन विनापि गजा नरपतिभुवनेषु गौरविता भवन्ति।
विन्ध्यो न भवत्यगजो गजैर्बहुभिरपि गतैः॥ १८८॥
गोमहिषतुरङ्गाणां पशूनां सर्वाणां युज्यते स्थानं।
दग्धगजेन्द्राणां पुनोऽथ विन्ध्योऽथ महाराजः॥ १८९॥

गयवज्जा

वियसियमएण गयजोव्वणेण उल्लन्तदन्तमुसलेण ।
अज्ज वि वणं सणाहं जूहाहिव पइ जियन्तेण ॥ १९० ॥
अज्ज वि संभरइ गओ मज्जन्तो सरवरम्मि लीलाए ।
जं करिणिकरग्गुम्मूलिएण पहओ मुणालेण ॥ १९१ ॥
मा सुमरसु चन्दणपल्लवाण करिणाह गेण्ह तिणकवलं ।
जं जह परिणमइ दसा तं तह धीरा पडिच्छन्ति ॥ १९२ ॥
मा झिज्जसु अणुदियहं करिणिविओएण मूढकरिणाह ।
सोक्खं न होइ कस्स वि निरन्तरं एत्थ संसारे ॥ १९३ ॥
जायासुयविरहविसंठुलस्स जूहाहिवस्स विञ्झम्मि ।
ते सरसपल्लवा सल्लईए विसकवलसारिच्छा ॥ १९४ ॥
गइयकुहाउलियस्स य वल्लहकरिणीसुहं भरन्तस्स ।
सरसो मुणालकवलो गयस्स हत्थे च्चिय विलीणो ॥ १९५ ॥
तह नीससियं जूहाहिवेण चिरविलसियं भरन्तेण ।
करगहियं तिणकवलं हरियं जह झत्ति पज्जलियं ॥ १९६ ॥
विरहपलित्तो रे वर – गइन्द मा भञ्ज सयलवणराई ।
उम्मूलिए वि विञ्झे विरहावत्था तह च्चेय ॥ १९७ ॥
जूहाओ वणगहणं गहणाउ सरं सराउ गिरिसिहरं ।
सिहराहिंतो पुहवी निएइ हत्थी पियाविरहे ॥ १९८ ॥
करिणिकरप्पियनवसरसल्लईकवलभोयणं दन्ती ।
जइ न मरइ सुमरन्तो ता किं किसिओ वि मा होउ ॥१९९॥

गजपद्धतिः

विगलितमदेन गतयौवनेन चलद्दन्तमुसलेन ।
अद्यापि वनं सनाथं यूथाधिप त्वया जीवता ॥ १९० ॥

अद्यापि संस्मरति गजो मज्जन् सरोवरे लीलया ।
यत्करिणीकराग्रोन्मूलितेन प्रहतो मृणालेन ॥ १९१ ॥

मा स्मर चन्दनपल्लवानां करिनाथ गृहाण तृणकवलं ।
या यथापरिणमति दशा तां तथा धीरः प्रतीच्छन्ति ॥ १९२ ॥

मा क्षीयस्वानुदिवसं करिणिवियोगेन मूढकरिनाथ ।
सौख्यं न भवति कस्यापि निरन्तरमत्र संसारे ॥ १९३ ॥

जायासुतविरहविसंस्थुलस्य यूथाधिपतेर्विन्ध्ये ।
ते सरसपल्लवाः शल्लक्या विषकवलसदृशाः ॥ १९४ ॥

गुरुक्षुधाकुलितस्य च वल्लभाकरिणीसुखं स्मरतः ।
सरसो मृणालकवलो गजस्य हस्त एव विलीनः ॥ १९५ ॥

तथा निःश्वसितं यूथाधिपेन चिरविलसितं स्मरता ।
करगृहीतं तृणकवलं हरितं यथा झटिति प्रज्वलितं ॥ १९६ ॥

विरहप्रदीप्तो रे वरगजेन्द्र मा भञ्जस्व सकलवनराजीः ।
उन्मूलितेऽपि विन्ध्ये विरहावस्था तथैव ॥ १९७ ॥

यूथाद्वनगहनं गहनात्सरः सरसो गिरिशिखरं ।
शिखरेभ्यः पृथिवीं पश्यति हस्ती प्रियाविरहे ॥ १९८ ॥

करिणीकरार्पितनवसरसशल्लकीकवलभोजनं दन्ती ।
यदि न स्रियते स्मरंस्तदा किं क्षणोऽपि मा भवतु ॥ १९९ ॥

सीहवज्जा

किं करइ कुरङ्गी बहु-सुएहि ववसायमाणरहिएहिं ।
एक्केण वि गयघडदारणेण सिंही सुहं सुवइ ॥ २०० ॥
जाइविसुद्धाण नमो ताण मइन्दाण अहह जियलोए ।
जे जे कुलम्मि जाया ते ते गयकुम्भनिद्दलणा ॥ २०१ ॥
मा जाणह जह तुङ्गत्तणेण पुरिसाण होइ सोण्डीरं ।
मडहो वि मइन्दो करि-वराण कुम्भत्थलं दलइ ॥ २०२ ॥
बेण्णि वि रणुप्पन्ना बज्झन्ति गया न चेव केसरिणो ।
संभाविज्जइ मरणं न गञ्जणं धीरपुरिसाणं ॥ २०३ ॥

वाहवज्जा

एक्कसरपहरदारिय-माइन्दगइन्दजुज्झमाभिडिए ।
वाहि न लज्जसि नच्चसि दोहग्गे पायडिज्जन्ते ॥ २०४ ॥
कत्तो तं रायघरेसु विलसियं जं घरम्मि वाहस्स ।
गयकुम्भवियारियमोत्तिएहि जं जङ्गलं किणइ ॥ २०५ ॥
अज्ज कयत्थो दियहो वाहवहू रूवजोव्वणुम्मइया ।
सोहग्गं धणुरुम्मच्छलेण रच्छासु विक्खिरइ ॥ २०६ ॥
ओखिप्पइ मण्डलमारुएण गेहङ्गणाउ वाहीए ।
सोहग्गधयवडाइ व्व धणुरओ रुम्परिञ्छोली ॥ २०७ ॥
जह जह वड्ढन्ति थणा तह तह झिज्जन्ति पञ्चवत्थूणि ।
मज्झं पइ कोयण्डं पलिजुवाणा सवत्तीओ ॥ २०८ ॥

सिंहपद्धतिः

किं करोति कुरङ्गी बहुसुतैर्व्यवसायमानरहितैः ।
एकेनापि गजघटदारणेन सिंही सुखं स्वपिति ॥ २०० ॥
जातिविशुद्धेभ्यो नमस्तेभ्यो मृगेन्द्रेभ्योऽहह जीवलोके ।
ये ये कुले जातास्ते ते गजकुम्भनिर्दलनाः ॥ २०१ ॥
मा जानीत यदि तुङ्गत्वेन पुरुषाणां भवति शौण्डीर्यं ।
लघुरपि मृगेन्द्रः करिवराणां कुम्भस्थलं दालयति ॥ २०२ ॥
उभयेऽप्यरण्योत्पन्ना बध्यन्ते गजा नैव केसरिणः ।
संभाव्यते मरणं न गञ्जनं धीरपुरुषाणां ॥ २०३ ॥

व्याधपद्धतिः

एकशरप्रहारदारितमृगेन्द्रगजेन्द्रयुद्धे प्रवृत्ते ।
व्याधि न लज्जसे नृत्यसि दौर्भाग्ये प्रकटीक्रियमाणे ॥ २०४ ॥
कुतस्तद्राजगृहेषु विलसितं यद्गृहे व्याधस्य ।
गजकुम्भविदारितमौक्तिकैर्यज्जङ्गलं क्रीयते ॥ २०५ ॥
अद्य कृतार्थो दिवसो व्याधवधू रूपयौवनोन्मत्ता ।
सौभाग्यं धनुरुल्लिखनच्छलेन रथ्यासु विक्षिरति ॥ २०६ ॥
अहो चिप्यते मण्डलीमारुतेन गेहाङ्गणाद्व्याधवध्वाः ।
सौभाग्यध्वजपताकेव धनूरजस्तक्षपङ्क्तिः ॥ २०७ ॥
यथा यथा वर्धते स्तनौ तथा तथा चीयन्ते पञ्चवस्तूनि ।
मध्यं पतिः कोदण्डं पल्लियुवानः सपत्न्यः ॥ २०८ ॥

जह जह वड्ढन्ति थणा वियसइ मयणो मवम्महा दिट्ठी ।
तह तह वाहजुवाणो दियहे दियहे घणुल्लिहइ ॥ २०९ ॥
जइ जइ न चडइ चावो उम्मिलइ करइ पल्लिणाहस्स ।
तह तह सुण्हा विप्फुल्लगण्डविवरम्मुही हसइ ॥ २१० ॥
दिन्नं थणाण अग्घं करिणीजूहेण वाहवहुयाए ।
रण्डत्तणं न पत्तं हे सुन्दरि तुह पसाएणं ॥ २११ ॥
सिहिपेहुणावयंसा वहुया वाहस्स गव्विरी भमइ ।
गयमुत्तागहियपसाहणाण मज्झे सवत्तीणं ॥ २१२ ॥
वाणियय हत्थिदन्ता कत्तो अम्हाण वग्घकित्तीओ ।
उत्तुङ्गथोरथणवट्टसालसा जं वहू सुवइ ॥ २१३ ॥
वग्धाण नहा सीहाण केसरा मोत्तिया गइन्दाणं ।
कत्तो वाणिय अम्हं मयचम्मपरिग्गहो नत्थि ॥ २१४ ॥

हरिणवज्जा

हरिणा जाणन्ति गुणा रणे वसिऊण गेयमाहप्पं ।
ताणं चिय नत्थि धणं जीयं वाहस्स अप्पन्ति ॥ २१५ ॥
अम्हाण तिणङ्कुरभोयणाण न हु किं पि संचियं दविणं ।
मह मंसपिण्डतुट्ठो जइ वच्चइ ता अहं धन्नो ॥ २१६ ॥
एक्केण वि सरउ सरेण वाह किं बीयएण गहिएण ।
एक्कं पि वसइ जीयं हयास दोहिं पि य सरीरे ॥ २१७ ॥
सरसल्लिएण भणियं कन्धं धुणिऊण जूहहरिणेण ।
गिज्जउ पुणो वि गिज्जाउ जाव य कण्ठट्ठिओ जीवो ॥ २१८ ॥

यथा यथा वर्धेते स्तनौ विकसति मदनः समन्मथा दृष्टिः।
तथा तथा व्याधयुवा दिवसे दिवसे धनुरुल्लिखति ॥ २०९ ॥
यथा यथा न घटति चापो भ्रश्यते करात्पल्लिनाथस्य।
तथा तथा स्नुषा विस्फारदृष्टविपराङ्मुखी हसति ॥ २१० ॥
दत्तं स्तनयोरर्घं करिणीयूथेन व्याधवध्वाः।
रण्डात्वं न प्राप्तं हे सुन्दरि तव प्रसादेन ॥ २११ ॥
शिखिपिच्छावतंसा वध्वा व्याधस्य गर्वमती भ्राम्यति।
गजमुक्ताग्टहीतप्रसाधनानां मध्ये सपत्नीनां ॥ २१२ ॥
वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्त्यः।
उत्तुङ्गपृथुस्तनपृष्ठसालसा यद्वधूः स्वपिति ॥ २१३ ॥
व्याघ्राणां नखाः सिंहानां केसरा मौक्तिकानि गजेन्द्राणां।
कुतो वाणिजास्माकं मृगचर्मपरिग्रहो नास्ति ॥ २१४ ॥

हरिणपद्धतिः

हरिणा जानन्ति गुणानरण्य उषित्वा गेयमाहात्म्यं।
तेषामेव नास्ति धनं जीवं व्याधस्यार्पयन्ति ॥ २१५ ॥
अस्माकं तृणाङ्कुरभोजनानां न खलु किमपि संचितं द्रविणं।
मम मांसपिण्डतुष्टो यदि व्रजति तदाहं धन्यः ॥ २१६ ॥
एकेनापि पूर्यतां शरेण व्याध किं द्वितीयेन ग्टहीतेन।
एकमपि वसति जीवं हताश द्वयोरपि च शरीरे ॥ २१७ ॥
शरशल्यितेन भणितं स्कन्धं धूत्वा जीर्णहरिणा।
गीयतां पुनर्गीयतां यावन्न कण्ठस्थितो जीवः ॥ २१८ ॥

घाएण मग्गो सद्देण मई चोज्जेण वाहवङ्कया वि ।
अवठम्भिऊण धणुहं वाहेण वि मुक्किया पाणा ॥ २१९ ॥

करहवज्जा

कङ्केल्लिपल्लवो वेल्लमणहरे जइ वि नन्दणे चरइ ।
करहस्स तह वि मरुविलसियाइ हियए खुडुक्कन्ति ॥ २२० ॥
ते गिरिसिहरा ते पीलुपल्लवा ते करीरकसरक्का ।
लब्भन्ति करह मरुविलसियाइ कत्तो वणेत्थम्मि ॥ २२१ ॥
पुणरुत्तपसारियदीहकन्धरो करह किं पलोएसि ।
कत्तो लब्भन्ति मरुत्थलीउ दिव्वे पराहुत्ते ॥ २२२ ॥
दीहुण्हपउरनीसाससोसियासेसपीलुसयसिहरे ।
कवलं पि न गेण्हसि करह मुद्ध किं चक्खियमउव्वं ॥ २२३ ॥
उन्नयकन्धर मा जूर करह ता धरसु किंचि चरिऊण ।
तुह जोग्गा अक्कमरुत्थलीउ तुङ्गा तह कत्तो ॥ २२४ ॥
जं जीहाए विलग्गं किंचि वरं मामि तस्स तं दिट्ठं ।
थुक्केइ चक्खिउं वण-सयाइ करहो धुयग्गीवो ॥ २२५ ॥
अन्नेहिं पि न पत्ता पत्तलकरहेहि करह सा वेल्ली ।
को एसो तुज्झ गहो जं चिन्तसि विञ्झसिहराइं ॥ २२६ ॥

मालईवज्जा

तह तुह विरहे मालइ महिमण्डलवन्दणिज्जमयरन्दे ।
परिझीणं भमरउलं जह जायं ससयवन्दं व ॥ २२७ ॥

घातेन मृगो शब्देन मृगयाश्चर्येण व्याधवधूरपि ।
अवष्टभ्य धनुर्व्याधेनापि मुक्ताः प्राणाः ॥ २१८ ॥

करभपद्धतिः

कङ्केल्लिपल्लवो विल्वमनोहरे यद्यपि नन्दने चरति ।
करभस्य तथापि मरुविलसितानि हृदय आविर्भवन्ति ॥ २२० ॥
तानि गिरिशिखराणि ते पिलुपल्लवास्ते करीरकुड्मलाः ।
लभ्यन्ते करभ मरुविलसितानि कुतो वनेऽत्र ॥ २२१ ॥
पुनरुक्तप्रसारितदीर्घकन्धरः करभ किं प्रलोकयसि ।
कुतो लभ्यन्ते मरुस्थल्यो दैवे पराङ्मुखे ॥ २२२ ॥
दीर्घोष्णप्रचुरनिःश्वासशोषिताशेषपीलुशतशिखरे ।
कवलमपि न गृह्णासि करभ मुग्ध किमास्वादितमपूर्वं ॥ २२३ ॥
उन्नतकन्धर मा खिद्यस्व करभ तस्माद्दूरस्व किंचिच्चरित्वा ।
तव योग्या अर्कमरुस्थल्यस्तुङ्गास्तरवः कुतः ॥ २२४ ॥
यच्छिक्कायां विलग्नं किंचिद्दरं मामि तस्य तद्दृष्टं ।
थूत्कारोत्यास्वादयितु वनशतानि करभो धुतग्रीवः ॥ २२५ ॥
अन्यैरपि न प्राप्ता कृशकरभैः करभ मा वल्ली ।
क एष तव ग्रहो यच्चिन्तयसि विन्ध्यशिखराणि ॥ २२६ ॥

मालतीपद्धतिः

तथा तव विरहे मालति महीमण्डलवन्दनीयमकरन्दे ।
परिचीणं भ्रमरकुलं यथा जातं मशककृन्दमिव ॥ २२७ ॥

वड्डसु मालइकलिए निब्भरमयरन्दपरिमलुग्गारे ।
मुच्चन्तु छप्पया सेसकुसुमसेवाकिलेसस्स ॥ २१८ ॥
वियसन्तु नाम गन्धुद्धुराउ सेसाउ कुसुमजाईओ ।
इन्दिन्दिरस्स रणरणयकारणं मालइ च्चेव ॥ २१९ ॥
मउइं मालइकलियं महुयर दट्ठूण किं पराहुत्तो ।
एत्तो पसरइ भुवणन्तराइ गन्धो वियम्भन्तो ॥ २२० ॥
मउइल्लियाए किं तुह इमीए किं वा दलेहि तलिणेहिं ।
आमोए महुयर मालईए जाणिहिसि माहप्पं ॥ २२१ ॥
तह वासियं वणं मालईए कुसुमेहि निब्भरं सरए ।
जह इत्थ तत्थ कत्थवि भमरा दुक्खेहि लक्खन्ति ॥ २२२ ॥
का समसीसी सह मालईए सेसाण कुसुमजाईणं ।
जस्स वि गन्धविलित्ता भसला भसलेहि पिज्जन्ति ॥ २२३ ॥
कलियामिसेण उब्भेवि अङ्गुलिं मालईए महमहियं ।
धरउ जु धरणसमत्थो मह एत्तो महुयरजुवाणो ॥ २२४ ॥
पक्खुक्खेवं महसूइखण्डणं भमरभरसमुव्वहणं ।
उय सहइ घरहरन्तो त्ति दुव्वला मालइ च्चेव ॥ २२५ ॥

इन्दिन्दिरवज्जा ।

इन्दिन्दिर छप्पय भसल भमर भमिओ सि काणणं सयलं ।
मालइसरिसं कुसुमं जइ दिट्ठं किं न ता भणसि ॥ २२६ ॥
कत्थ वि दलं न गन्धं कत्थ वि गन्धो न पउरमयरन्दो ।
एक्ककुसुमम्मि महुयर बे तिण्णि गुणा न लब्भन्ति ॥ २२७ ॥

वर्धस्व मालतीकलिके निर्भरमकरन्दपरिमलोद्गारे।
मुञ्चन्तु षट्पदाः शेषकुसुमसेवाक्लेशात्॥ २२८॥
विकसन्तु नाम गन्धोद्धुराः शेषाः कुसुमजातयः।
इन्दिन्दिरस्य रणरणककारणं मालत्येव॥ २२९॥
लब्ध्वौ मालतीकलिकां मधुकर दृष्ट्वा किं पराङ्मुखः।
इतः प्रसरति भुवनान्तराणि गन्धो विजृम्भमाणः॥ २३०॥
लघुतया किं तवैतस्याः किं पत्त्रैस्तलिनैः।
आमोदे मधुकर मालत्या ज्ञास्यसि माहात्म्यं॥ २३१॥
तथा वासितं वनं मालत्याः कुसुमैर्निर्भरं शरदि।
यथात्र तत्र कुत्रापि भ्रमरा दुःखैर्लभ्यन्ते॥ २३२॥
का प्रतिस्पर्धा सह मालत्या शेषाणां कुसुमजातीनां।
यस्यापि गन्धविलिप्ता भ्रमरा भ्रमरैः पीयन्ते॥ २३३॥
कलिकामिषेणोर्ध्वीकृत्याङ्गुलिं मालत्या कथितं।
धारयत यो धरणसमर्थो माम् प्रत्यागच्छन्तं मधुकरयुवानं॥२३४॥
पत्त्रोत्क्षेपं नखसूचिखण्डनं भ्रमरभरसमुद्वहनं।
पश्य सहते कम्पमानापि दुर्बला मालत्येव॥ २३५॥

इन्दिन्दिरपद्धतिः।

इन्दिन्दिर षट्पद भसल भ्रमर भ्रान्तोऽसि काननं सकलं।
मालतीसदृशं कुसुमं यदि दृष्टं किं न तदा भणसि॥ २३६॥
कुत्रापि दलं न गन्धः कुत्रापि गन्धो न प्रचुरमकरन्दः।
एककुसुमे मधुकर द्वौ त्रयो गुणा न लभ्यन्ते॥ २३७॥

एअं महुयरहियं　तं च्चिय पुण मालईए पडिहट्ठं ।
सेसा फुल्लन्तु फलन्तु पायवा को निवारेइ ॥ २३८ ॥

मालइ पुणो वि मालइ　हा मालइ मालइ त्ति जम्पन्तो ।
उव्विग्गो भमइ अली　हिण्डन्तो सयलवणराई ॥ २३९ ॥

रुणरुणइ वलइ वेल्लइ　पक्खउडं धुणइ खिवइ अङ्गाइं ।
मालइकलियाविरहे　पज्झावत्थं गओ भमरो ॥ २४० ॥

मालइविरहे रे तरुणभसल मा रुवसु निब्भरुक्कण्ठं ।
वसहविओयदुक्खं　मरणेण विणा न वीसरइ ॥ २४१ ॥

जाव न वियसइ सरसा　वरइ न ईसं पि मालईकलिया ।
अविणीयमहुयरेहिं　ताव च्चिय पाउमारद्धा ॥ २४२ ॥

वियसन्तसरसतामरसभसल वियसेइ मालई जाव ।
ता जत्थ व तत्थ व जह　व तह व दियहा गमिज्जन्ति ॥ २४३ ॥

छप्पय गमेसु कालं　वासवकुसुमाइ ताव मा मुयसु ।
मन्न जियन्तो पेच्छसि　पउरा रिद्धी वसन्तस्स ॥ २४४ ॥

मा इन्दिन्दिर तुङ्गसु　पङ्कयदलनिलय मालईविरहे ।
तुम्बिणिकुसुमाइ न मं—पडन्ति दिव्वे पराहुत्ते ॥ २४५ ॥

इयरकुसुमेसु महुयर　दे बन्ध रइं विमुञ्च रणरणयं ।
झायन्तो च्चिय मरिहिसि　कत्तो ते मालई मरए ॥ २४६ ॥

भमरो भमरो त्ति गुणोज्झिएहि कुसुमेहि लाइओ दोसो ।
लहिऊण मालइं पुण　सो निउणो भमउ जइ भमइ ॥ २४७ ॥

कुन्दलयामउलपरिट्ठिएण भरिऊण मालइविलासं ।
तह नीससियं इन्दिन्दिरेण जह सा वि पज्जलिया ॥ २४८ ॥

नियनालस्स वि विमुहो ता पङ्कय कस्स समुहो सि ॥ ७१४ ॥
वड्ढावियकोसो जं सि कमल परिसोसिएहि पत्तेहिं ।
अच्छउ ता लच्छिवओ तं चिय नामं पि हारिहिसि ॥ ७१५ ॥
मित्तो सूरो कयप – त्तपरियरो लच्छियालओ कमलो ।
पयहीणस्स सहारो केणावि न सक्किओ निमिसं ॥ ७१६ ॥
सरसाण सूरपरिसं – ठियाण कमलाण कीस उवयारो ।
उक्खयमूला सुक्क – न्तपङ्कया कह न संठविया ॥ ७१७ ॥

प्रकटितकोशगुणाढ्ये तथा च कुलीने सुपत्त्रपरिवारे (सुपात्र०)।
एवंविधे वसन्ती कमले हे कमले कृतार्थासि ॥ ७०८॥

जडसंवाहितपरुषत्वस्य निकृतनिजगुणौघस्य।
रे कमल तव कमला निवसति रक्तानां पत्त्राणां (पात्राणां)
॥ ७०९॥

यथा कर्पासगुणाः परिच्छिद्रच्छादने तथाहो कमल यदि तव।
तत इह सकले लोके काउपमास्तव स्याप्यन्ते ॥ ७१०॥

कमलनिन्दा-पद्धतिः।

अत्यालापे (अलीकं ?) विकसत्कमल कलितोऽसि राजहंसैः।
ततः सुन्दरं न भविष्यति तव फलं कालपरिणामे ॥ ७११॥

आत्मानं परं च न जानीषे नूनं सगुणो सि लक्ष्मीपरिकरितः।
उज्ज्वलसमूहः(!) पश्यत ततो वदनमपि खलु न स्थापयति ॥ ७१२॥

लक्ष्म्या परिगृहीतान्यूर्ध्वमुखानि यदि न भवन्ति ततः पश्य।
यैरेवोर्ध्वीकृतानि तान्येव नालानि न पश्यन्ति ॥ ७१३॥

लक्ष्मीनिलयनोत्तानवदन गुणिनः सदानुलग्नस्य।
निजनालस्यापि विमुखस्ततः पङ्कज कस्य संमुखोऽसि ॥ ७१४॥

वर्धितकोशो यदसि कमल परिशोषितैः पत्त्रैः।
आस्तां तावल्लक्ष्मीपदं तदेव नामापि हारिष्यसि ॥ ७१५॥

मित्रं सूर्यः कृतपत्त्रपरिकरो लक्ष्म्यालयः कमलः।
पदहीनस्य सधारः केनापि न शोके निमिषं ॥ ७१६॥

सरसानां सूर्यपरिसंस्थितानां कमलानां कीदृगुपकारः।
उत्खातमूलाः शुष्यन्तः पङ्कजाः कथं न संस्थापिताः ॥ ७१७॥

हंससमाणवज्जा ।

कण्डिज्जइ हंस सरं कत्तो वासो परम्मुहे दिव्वे ।
जाव न ठवेइ चलणे कूडवओ मत्थए णिहं ॥ ७१८ ॥
पढमं चिय जे विगया घणागमे माइ ताण हंसाणं ।
जेहि न दिट्ठं उच्चा — मणट्ठियं खलवयकुडुम्बं ॥ ७१९ ॥
इयरविहङ्गमपयप — न्तिचित्तला जत्थ पुलिणपेरन्ता ।
तत्थ सरे न हु जुत्तं वसियव्वं रायहंसाणं ॥ ७२० ॥
विविहविहङ्गमनिवहे — ण मण्डियं पेच्छिऊण कमलवणं ।
मुक्कं माणभरिए — हि माणसं रायहंसेहिं ॥ ७२१ ॥

चक्कवायवज्जा ।

अद्धत्थमिए सूरे जं दुक्खं होइ चक्कवायस्स ।
तं होउ तुह रिऊणं अहवा ताणं पि मा होउ ॥ ७२२ ॥
भूमीगयं न चत्ता सूरं दट्ठूण चक्कवाएण ।
जीयग्गल व्व दिन्ना मुणालिया विरहभीएण ॥ ७२३ ॥
अग्गि व्व पउमसण्डं चिय व्व नलिणी सडो व्व अप्पाणं ।
चक्केण पियाविरहे समाणसरिसं सरं दिट्ठं ॥ ७२४ ॥
आसासिज्जइ चक्को जलगयपडिबिम्बदंसणासाए ।
तं पि हरन्ति तरङ्गा पेच्छह निउणत्तणं विहिणो ॥ ७२५ ॥
आसन्ति सङ्गमासा गमन्ति रयणिं सुहेण चक्काया ।
दियहा न हुन्ति विओ — यकायरा कह नु बोलन्ति ॥ ७२६ ॥

हंससमान-पद्धतिः ।

त्यज्यते हंस सरः कुतो वासः पराङ्मुखे दैवे ।
यावन्न स्थापयति चरणौ कूटबको मस्तके इदानीं ॥ ७१८ ॥
प्रथममेव ये विगता घनागमे साधु तेषां हंसानां ।
यैर्न दृष्टमुच्चासनस्थितं खलबककुटुम्बं ॥ ७१९ ॥
इतरविहङ्गमपदपङ्क्तिचित्रला यत्र पुलिनपर्यन्ताः ।
तत्र सरसि न खलु युक्तं वसितव्यं राजहंसानां ॥ ७२० ॥
विविधविहङ्गमनिवहेन मण्डितं प्रेक्ष्य कमलवनं ।
मुक्तं मानभृतैर्मानसं राजहंसैः ॥ ७२१ ॥

चक्रवाक-पद्धतिः ।

अर्धास्तमिते सूर्ये यद्दुःखं भवति चक्रवाकस्य ।
तद्भवतु तव रिपूणामथवा तेषामपि मा भवतु ॥ ७२२ ॥
भूमिगतं न त्यक्त्वा सूर्यं दृष्ट्वा चक्रवाकेन ।
जीवार्गला दत्तेव मृणालिका विरहभीतेन ॥ ७२३ ॥
अग्निरिव पद्मषण्डं चितेव नलिनीं मृतकमिवात्मा ।
चक्रेण प्रियाविरहे श्मशानसदृशं सरो दृष्टं ॥ ७२४ ॥
आश्वास्यते चक्रो जलगतप्रतिबिम्बदर्शनाशया ।
तामपि हरन्ति तरङ्गाः पश्यत निपुणत्वं विधेः ॥ ७२५ ॥
आसते सङ्गमाशा गमयन्ति रजनीं सुखेन चक्रवाकाः ।
दिवसा न च भवन्ति वियोगकातराः कथं नु व्यतिक्रामन्ति ॥ ७२६ ॥

अलियं जम्पेइ जणो जं पेम्मं होइ अत्थलोहेण ।
सेवालजीवियाणं कओ धणं चक्कवायाणं ॥ १२७ ॥

चन्दणवज्जा ।

सुमिएण निहसिएण वि तह कह वि हु चन्दणेण महमहियं ।
सरसा वि कुसुममाला जह जाया परिमलविलक्खा ॥ १२८ ॥
परसुच्छेयपहरणे—ण निहसणे नेय उज्झिया पयई ।
चन्दण सज्जणसीसो तेण तुमं वन्दए लोओ ॥ १२९ ॥
उत्तमकुलेसु जम्मं तुह चन्दण तरुवराण मज्झम्मि ।
दुज्जीहाण खलाण य निच्चं चिय तेण अणुरत्तो ॥ १३० ॥
एक्को च्चिय दोसो ता—रिसस्स चन्दणदुमस्स विहिघडिओ ।
जीसे दुट्ठभुयङ्गा खणं पि पासं न मेल्लन्ति ॥ १३१ ॥
बहुतरुवराण मज्झे चन्दणविडवो भुयङ्गदोसेण ।
छिज्जइ निरावराहो साहु व्व असाहुसङ्गेण ॥ १३२ ॥

वडवज्जा ।

जाओ सि कीस पन्थे अहवा जाओ सि कीस फलिओ सि ।
अह फलिओ सि महादुम ता सउणविडम्बणं सहसु ॥ १३३ ॥
नीरसकरीरखरखइ—रसङ्कुले विसमसमिमरुद्देसे ।
का होज्ज गई पहिया—ण जं सि वडपायव न होन्तो ॥ १३४ ॥
भूमीगुणेण वडपा—यवस्स जइ तुङ्गिमा इहं होइ ।
तह वि हु फलाण रिद्धी होसइ बीयाणुसारेण ॥ १३५ ॥

कन्नीकं भ्रमति जनो यत्प्रेमा भवत्यर्थलोभेन।
शैवालजीविकानां कुतो धनं चक्रवाकानां॥ १२७॥

चन्दन-पद्धतिः।

शोषितेन निघर्षितेनापि तथा कथमपि खलु चन्दनेन प्रसृतं।
सरसापि कुसुममाला यथा जाता परिमलविलक्षा॥ १२८॥
परशुच्छेदप्रहरणेन निघर्षणेनैव त्यक्ता प्रकृतिः।
चन्दन संततशिरास्तेन त्वां वन्दते लोकः॥ १२९॥
उत्तमकुलेषु जन्म तव चन्दन तरुवराणां मध्ये।
द्विजिह्वानां खलानां नित्यमेव तेनानुरक्तः॥ १३०॥
एक एव दोषस्तादृशस्य चन्दनद्रुमस्य विधिघटितः।
यस्य(!) दुष्टभुजङ्गाः क्षणमपि पार्श्वं न मुञ्चन्ति॥ १३१॥
बहुतरुवराणां मध्ये चन्दनविटपो भुजङ्गदोषेण।
छिद्यते निरपराधः साधुरिवासाधुसङ्गेन॥ १३२॥

वट-पद्धतिः।

जातोऽसि किं पथ्यथवा जातोऽसि किं फलितोऽसि।
अथ फलितोऽसि महाद्रुम तदा शकुनविडम्बनां सहस्व॥ १३३॥
नीरसकरीरखरखदिरसङ्कुले विषमशमीमरुद्देशे।
का भवेद्गतिः पथिकानां यदि वटपादप नाभविष्यः॥ १३४॥
भूमिगुणेन वटपादपस्य यदि तुङ्गत्वमिह भवति।
तथापि खलु फलानामृद्धिर्भविष्यति बीजानुसारेण॥ १३५॥

तालवज्जा ।

किं ताल तुज्झ तुङ्ग — त्तणेण गयणद्धरुद्धमग्गेण ।
कुहअलणताविएहि वि उवहेप्पमि जं न पहिएहिं ॥ ७३६ ॥
छायारहियस्स निरा — सयस्स दूरयरदावियफलस्स ।
दोसेहि समा जा का — वि तुङ्गिमा तुज्झ रे ताल ॥ ७३७ ॥
जेहिं चीओ वड्ढिं तालो सयसलिलदाणसेवाए ।
तस्सेव जो न फलिओ सो फलिओ कह नु अन्नस्स ॥ ७३८ ॥

पलासवज्जा ।

सउलत्तस्स य मुक्का तुज्झ पलासा पलास सउणेहिं ।
जेण सकुमाससमए नियवयणं झत्ति सामलियं ॥ ७३९ ॥
अच्छउ ता फलनिवहं फुल्लणदियहम्मि कलुसियं वयणं ।
इय कलिऊण पलासो झडन्ति मुक्को सपत्तेहिं ॥ ७४० ॥
दट्ठूण किंसुयासा — हा तं वालाए कीस वेलविओ ।
अहवा न तुज्झ दोसो को न ह छलिओ पलासेहिं ॥ ७४१ ॥
गुरुविहववित्थरत्थ — म्भिरे वि किविणम्मि अत्थिणो विहला ।
भण फलिए वि पलासे मणोरहा कस्स जायन्ति ॥ ७४२ ॥
सच्चं पलास जं फु — ल्लिओ सि फलिओ सि रहनिउञ्जेसु ।
जइ होज्ज सुखज्जफलो मणं पि ता तुज्झ को मुल्लो ॥ ७४३ ॥

ताल-पद्धतिः।

किं ताल तव तुङ्गत्वेन गगनार्धरुद्धमार्गेण।
क्षुधाज्वलनतापितैरप्युपगम्यसे यन्न पथिकैः॥ ७३६॥
छायारहितस्य निराश्रयस्य दूरतरदर्शितफलस्य।
दोषैः समं यत्किमपि तुङ्गत्वं तव रे ताल॥ ७३७॥
यैर्नीतो वृद्धिं तालः शतसलिलदानसेवया।
तस्यैव यो न फलितः स फलितः कथं नु अन्यस्य॥ ७३८॥

पलाश-पद्धतिः।

मुकुलयतश्च मुक्तास्तव पलाशाः पलाश शकुनैः।
येन मधुमाससमये निजवदनं झटिति श्यामलितं॥ ७३९॥
आस्तां तावत्फलनिवहः कुसुमदिवसे कलुषितं वदनं।
इति कलयित्वा पलाशो झटिति मुक्तः स्वपत्त्रैः॥ ७४०॥
दृष्ट्वा किंशुकशाखास्त्वं बालया किं वञ्चितः।
अथवा न तव दोषः को न खलु छलितः पलाशैः॥ ७४१॥
गुरुविभवविस्तरोत्तम्भनशीलेऽपि कृपणेऽर्थिनो विफलाः।
भण फलितेऽपि पलाशे मनोरथाः कस्य जायन्ते॥ ७४२॥
सत्यं पलाश यत्पुष्पितोऽसि फलितोऽसि रहोनिकुञ्जेषु।
यदि भवेः सुस्वाद्यफलो मनागपि ततस्तव किं मूल्यं॥ ७४३॥

वडवाणलवज्जा।

सोसणसई उ निवसइ वडवाणल सुणइ जाव न समुद्दो।
जाव य जाणिहिइ फुडं ता न तुमं नेय भुवणयलं॥ १४४॥
का सससीसी तियसि — न्दयाण वडवाणलस्स सरिसम्मि।
उवसमियसिहीपसरो सयरहरो इन्धणं जस्स॥ १४५॥

रयणायरवज्जा।

रयणायरेण रयणं परिमुक्कं जइ वि अमुणियगुणेण।
तह वि हु मरगयखण्डं जत्थ गयं तत्थ वि महग्घं॥ १४६॥
जलणिहिमुक्केण वि कु — त्थुहेण पत्तं मुरारिवच्छयलं।
तेण पुण तस्स ठाणं न याणिमो को परिट्ठविस्सं॥ १४७॥
मा दोसं चिय गेण्हह विरले वि गुणे पसंसह जणस्स।
अक्खपउरो वि उवही भण्णइ रयणायरो लोए॥ १४८॥
वेलामहल्लकल्लो — लपेल्लियं जइ वि गिरिणइं पत्तं।
अणुसरइ मग्गलग्गं पुणो वि रयणायरे रयणं॥ १४९॥
लच्छीए विणा रयणा — यरस्स गम्भीरिमा तह च्चेव।
सा लच्छी तेण विणा भण कस्स न मन्दिरं पत्ता॥ १५०॥
वडवाणलेण गहिओ महिओ सुरासुरेहिं सयलेहिं।
लच्छीए उवहि मुक्को पेच्छह गम्भीरिमा तस्स॥ १५१॥
अलयं जलं च अमियं विसं च कण्हो सदा नवो चेव।
खीरोयहि तुज्झ तहा परमहिमा अहिययहिययरो॥ १५२॥

वडवानल—पद्धतिः ।

ग्रीषणमतिनिर्विम वडवानल जानाति यावन्न समुद्रः ।
यावत्समुद्रो ज्ञास्यति स्फुटं तावन्न त्वं नैव भुवनतलं ॥ १४४ ॥
का स्पर्धा त्रिदशेन्द्राणां वडवानलेन सह ।
उपशमितशिखिप्रसरो मकरगृह इन्धनं यस्य ॥ १४५ ॥

रत्नाकर—पद्धतिः ।

रत्नाकरेण रत्नं परिमुक्तं यद्यप्यज्ञातगुणेन ।
तथापि खलु मरकतखण्डं यत्र गतं तत्रापि महार्घं ॥ १४६ ॥
जलनिधिमुक्तेनापि कौस्तुभेन प्राप्तं मुरारिवक्षःस्तलं ।
तेन पुनस्तस्य स्थाने न जानीमः कः परिस्थापितः ॥ १४७ ॥
मा दोषमेव गृह्णीत विरलानपि गुणान् प्रशंसत जनस्य ।
अक्षप्रचुरोऽप्युदधिः कथ्यते रत्नाकरो लोके ॥ १४८ ॥
वेलापृथुलकल्लोलप्रेरितं यद्यपि गिरिणदौं प्राप्तं ।
अनुसरति मार्गलग्नं पुनरपि रत्नाकरे रत्नं ॥१४९ ॥
लक्ष्म्या विना रत्नाकरस्य गम्भीरता तथैव ।
सा लक्ष्मीस्तेन विना भण कस्य न मन्दिरं प्राप्ता ॥ १५० ॥
वडवानलेन गृहीतो मथितः सुरासुरैः सकलैः ।
लक्ष्म्योदधिर्मुक्तः पश्यत गम्भीरतां तस्य ॥ १५१ ॥
ज्वलनं जलं चामृतं विषं च कृष्णः सदा नव एव ।
क्षीरोदधे तव तथा परमहिमाधिकोऽधिकतरः ॥ १५२ ॥

रयणेहि निरन्तरपू—रिएहि रयणायरस्स न हु गव्वो ।
करिणो मुत्ताहलभं—मए वि मयभिम्भला दिट्ठी ॥ ७ ५ ३ ॥
अणवरयं देन्तस्स वि तुट्टन्ति न सायरे वि रयणाइं ।
पुव्वक्कएण खिज्जइ न हु लच्छी चायभोएहिं ॥ ७ ५ ४ ॥
रयणायरस्स न हु हो—इ तुच्छिमा निग्गएहि रयणेहिं ।
तह वि हु चन्दसरिच्छा विरला रयणायरे रयणा ॥ ७ ५ ५ ॥
रयणायरचत्तेण वि पत्तं चन्देण हरइ तिलयत्तं ।
तेण उण तस्स ठाणे न याणिमो को परिट्ठविओ ॥ ७ ५ ६ ॥
जइ वि हु कालवसेणं ससी समुद्दाओ कह वि विच्छुडिओ ।
तह वि हु तस्स पयावं आणन्दं कुणइ दूरे वि ॥ ७ ५ ७ ॥
रयणाइ सुराण सम—प्पिऊण वडवाणलस्स कुहियस्स ।
अप्पा देन्तेण तए समुद्द मुद्दङ्कियं भुवणं ॥ ७ ५ ८ ॥
अत्थि असङ्खा सङ्खा धवला रयणायरस्स संभूया ।
न हु ताण सद्दलद्धी जा जाया पञ्चजन्नस्स ॥ ७ ५ ९ ॥
जाएण तेण धवलो—कओसि नूणं समुद्द सङ्खेण ।
अत्थित्तणेण हत्थं पसारियं जस्स कण्हेणं ॥ ७ ६ ० ॥

समुद्दमिन्दावज्जा ।

साहीणामयरयणो अमरसरीरं च भुवणसकरेन्तो ।
उम्मिसरीहि न लज्जसि लहरीहि तरङ्गिणीनाह ॥ ७ ६ १ ॥
रयणायर त्ति नामं वहन्त ता उवहि किं न सुमिओ सि ।
मज्झे न जाणवत्तो अत्थत्थी जं गया पारे ॥ ७ ६ २ ॥

रत्नैर्निरन्तरपूरिते रत्नाकरस्य न खलु गर्वः ।
करिणो मुक्ताफलसंशयेऽपि मदविह्वला दृष्टिः ॥ १५३ ॥
अनवरतं ददतोऽपि क्षीयन्ते न सागरेऽपि रत्नानि ।
पुण्यक्षयेण क्षीयते न खलु लक्ष्मीस्त्यागभोगाभ्यां ॥ १५४ ॥
रत्नाकरस्य न खलु भवति तुच्छत्वं निर्गतै रत्नैः ।
तथापि खलु चन्द्रसदृक्षाणि विरलानि रत्नाकरे रत्नानि ॥ १५५ ॥
रत्नाकरत्यक्तेनापि प्राप्तं चन्द्रेण हरस्य तिलकत्वं ।
तेन पुनस्तस्य स्थाने न जानीमः कः परिस्थापितः ॥ १५६ ॥
यद्यपि खलु कालवशेन शशी समुद्रात्कथमपि [विरहितः] ।
तथापि खलु तस्य प्रतापमानन्दं करोति दूरेऽपि ॥ १५७ ॥
रत्नानि सुरेभ्यः समर्प्य वडवानलस्य क्षुधितस्य ।
आत्मानं ददता त्वया समुद्र मुद्राङ्कितं भुवनं ॥ १५८ ॥
सन्त्यसङ्ख्याः शङ्खा धवला रत्नाकरे सम्भृताः ।
न खलु तेषां शब्दलक्ष्मीर्या जाता पाञ्चजन्यस्य ॥ १५९ ॥
जातेन तेन धवलीकृतोऽसि नूनं समुद्र शङ्खेन ।
अर्थित्वेन हस्तः प्रसारितो यस्य कृष्णेन ॥ १६० ॥

समुद्रनिन्दा—पद्धतिः ।

स्वाधीनामृतरत्नोऽमरमरङ्क च भुवनमकुर्वन् ।
उल्लसनशीलाभिर्न लज्जसे लहरीभिस्तरङ्गिणीनाथ ॥ १६१ ॥
रत्नाकर इति नाम वहंस्तत उदधे किं न शुष्कोऽसि ।
मध्ये न यानवर्तिनोऽर्थार्थिनो यद्गताः पारे ॥ १६२ ॥

उवहि लहरीहि गव्विर – गज्जन्तो किं न दीह सुमिओ सि ।
जीसे गिम्हपिवासा वलन्ति वि वरमुहा पहिया ॥ १६३ ॥

सायर लज्जाए कह न मुओ चिन्ताए कह न विसन्नो ।
पइ झन्ते बोहित्थिय – हि किओ जलसंगहो अन्नो ॥ १६४ ॥

वड्ढो सि तुमं पीओ सि पव्वयं लङ्घिओ सि तं उवहि ।
किं गज्जसि अलियजण न लज्जसे उयहि किं भणिमो ॥ १६५ ॥

निट्ठोयउदयकङ्खिर पन्थिय मा वच्च सायरो एस ।
जत्थ नियत्तइ तण्हा अन्न च्चिय ते महद्देसा ॥ १६६ ॥

सुवसवज्जा ।

जलणपवेसो चामी – यरस्स कह मह्हि न उज्जए काउं ।
हड्डी जस्स परिक्ख – न्ति पत्थरा नवरि गुणनिवहं ॥ १६७ ॥

जलणडहणेण न तहा पत्थरघसणेण खण्डणे तह य ।
गुञ्जाहलसमतुलणे जं दुक्खं होइ कणयस्स ॥ १६८ ॥

झूरिज्जइ किं न जए किं न जरा आवए अकालम्मि ।
जइ सक्कर तुलइ खलो निरक्करो कञ्चणं खण्डं ॥ १६९ ॥

नाराय निरक्कर लो – हवन्त दोमुह य तुज्झ किं भणिमो ।
गुञ्जाए समं कणयं तोलन्तो कह न लज्जेसि ॥ १७० ॥

जह कणयं तह पडिमा – णपत्थरं पेच्छ तुलइ नाराओ ।
आहवा निरक्कराणं गुणदोसवियारणा कत्तो ॥ १७१ ॥

उदधे लहरीभिर्गर्वोद्वहनशीलगर्जन् किं न दीर्घं शुष्कोऽसि ।
यस्माद्ग्रीष्मपिपासा ज्वलन्त्यपि पराङ्मुखाः पथिकाः ॥ १६३ ॥

सागर लज्जया कथं न मृतश्चिन्तया कथं न विषमः ।
त्वयि सत्यपि प्रवहणस्थितैः कृतो जलसंग्रहोऽन्यः ॥ १६४ ॥

बद्धोऽसि त्वं पीतोऽसि पर्वतं लङ्घितोऽसि समुद्र ।
किं गर्जसेऽलीकजगति न लज्जसे उदधे किं भणामः ॥ १६५ ॥

निर्धौतोदककाङ्क्षणशील पथिक मा व्रज सागरोऽयं ।
यत्र निवर्तते तृष्णान्य एव ते सरउद्देशाः ॥ १६६ ॥

सुवर्ण—पद्धतिः ।

ज्वलनप्रवेशशातामीकरस्य कथं सखि न युज्यते कर्तुं ।
हा धिग्यस्य परीक्षयन्ति प्रस्तराः केवलं गुणनिवहं ॥ १६७ ॥

ज्वलनदहनेन न तथा प्रस्तरघर्षणेन खण्डने तथा च ।
गुञ्जाफलसमतुलने यद्दुःखं भवति कनकस्य ॥ १६८ ॥

खिद्यते किं न जगति किं न जरागच्छत्यकाले ।
यथा साक्षरस्तुलयति खटिकां निरक्षरः काञ्चनखण्डं ॥ १६९ ॥

नाराच निरक्षर लोहवन्हिमुख च तव किं भणामः ।
गुञ्जाफलेन समं कनकं तोलयन् कथं न लज्जसे ॥ १७० ॥

यथा कनकं तथा प्रतिमानप्रस्तरं पश्य तोलयति नाराचः ।
अथवा निरक्षराणां गुणदोषविचारणा कुतः ॥ १७१ ॥

आदिच्चवज्जा।

भमिओ सि भमसि भमिहिसि　अणुदिणु पासम्मि मेरुसिहरस्स।
जइ पावसि कञ्चणमा—मयं पि ता सूर सूरो सि॥ ११२॥
वियलियतेएण वि मम—हरेण जह दंसिओ दिणे अप्पा।
तह जइ रयणीए तुमं　ता मच्चं सूर सूरो सि॥ ११३॥
उयणं भुवणक्कमणं　अत्थमणं एक्कदिवसमज्झम्मि।
सूरस्स वि तिन्नि दसा　का गणणा इयरलोयस्स॥ ११४॥

दीवयवज्जा।

सगुणो नेहसउणो　नोइओ लोयलोयणाणन्दो।
नासियतमोहपसरो　किं सुयणो नेह जोइक्को॥ ११५॥
जोइक्को गिलइ तमं　तं चिय उग्गिलइ कज्जलमिसेणं।
अहवा सुद्धसहावा　हियए कलुसं न धारेन्ति॥ ११६॥
नियआलएसु मलिणा　कुणन्ति मलिणत्तणं जइच्छाए।
गुणनेहकन्तिजुत्तय　न जुज्जए तुज्झ जोइक्क॥ ११७॥
नियगुणनेहखयंकर　मलिणं नियआलयं कुणन्तस्स।
जोइक्क तुज्झ छाया　परिचत्ता तेण सुयणेहिं। ११८॥
किं तुज्झ पहाए किं　गुणेण किं दीव तुज्झ नेहेण।
छायं जस्स विसिट्ठा　दूरे वि चयन्ति निन्दन्ता॥ ११९॥

आदित्य—पद्धतिः ।

भ्रान्तोऽसि भ्रमसि भ्रमिष्यस्यनुदिवसं पार्श्वे मेरुशिखरस्य ।
यदि प्राप्नोषि काञ्चनमाषकमपि ततः सूर्य सूर्योऽसि ॥ १७२ ॥

विगलिततेजसापि शशधरेण यथा दर्शितो दिन आत्मा ।
तथा यदि रजन्यां त्वं ततः सत्यं सूर्य सूर्योऽसि ॥ १७३ ॥

उदयो भुवनाक्रमणमस्तमनमेकदिवसमध्ये ।
सूरस्यापि तिस्रो दशाः का गणनेतरलोकस्य ॥ १७४ ॥

दीपक—पद्धतिः ।

सगुणः स्नेहसंपूर्ण आलोकवाल्लोकलोचनानन्दः (सवर्तिकः तैल-
संपूर्णः उद्योतयुक्तः) ।
नाशिततमसोघप्रसरः किं सुजनो न हि ज्योतिष्कः ॥ १७५ ॥

ज्योतिष्को गिलति तमस्तदेवोद्गिलति कज्जलमिषेण ।
अथवा शुद्धस्वभावा हृदये कलुषं न धारयन्ति ॥ १७६ ॥

निजालयेषु मलिनाः कुर्वन्ति मलिनत्वं यदृच्छया ।
गुणस्नेहकान्तियुक्त न युज्यते तव ज्योतिष्क ॥ १७७ ॥

निजगुणस्नेहक्षयंकर मलिनं निजालयं कुर्वतः ।
ज्योतिष्क तव छाया परित्यक्ता तेन सुजनैः ॥ १७८ ॥

किं तव प्रभया किं गुणेन किं दीप तव स्नेहेन ।
छायां यस्य विशिष्टा दूरेऽपि त्यजन्ति निन्दन्तः ॥ १७९ ॥

पियोल्लासवज्जा ।

एक्केण विणा पियमा-णुसेण बहुयाइ हुन्ति दुक्खाइं ।
आलस्सो रणरणओ निद्दा पुलओ ससज्झसओ ॥ १८० ॥
एक्केण विणा पियमा-णुसेण सब्भावनेहभरिएणं ।
जणसङ्कुला वि पुहवी अव्वो रण्णं व पडिहाइ ॥ १८१ ॥
सो कत्थ गओ सो सुय-णवल्लहो सो सुहाण सयखाणी ।
सो मयणग्गिविणासो सो सो सोसेइ मह हियय ॥ १८२ ॥
सो होहिइ को वि दिणो जत्थ पिओ बाहुपञ्जरविलीणो ।
रइरहसखेयखिन्नो निज्झरइ पवासदुक्खाइं ॥ १८३ ॥
आविहिइ पिओ चुम्बिहि-इ निट्ठुरं चुम्बिऊण पुच्छिहिइ ।
दइए कुसल त्ति तुमं नमो नमो ताण दिवसाणं ॥ १८४ ॥
धन्नं तं चेव दिणं सा रयणी सयललक्खणसउण्णा ।
अमयं तं पि मुहुत्तं जत्थ पिओ झत्ति दीसिहिइ ॥ १८५ ॥
दूरयरदेसपरिसं-ठियस्स पियसङ्गमं महन्तस्स ।
आसाबन्धो च्चिय मा-णुसस्स अवलम्बए जीवं ॥ १८६ ॥
हिययट्ठिओ वि सुहवो तह वि हु नयणाण होइ दुप्पेच्छो ।
पेच्छइ विहिणा न कया मह हियए जालयगवक्खा ॥ १८७ ॥

दोसियवज्जा ।

दीहं लण्हं बहुसु-त्तसन्दयं कडियलम्मि सुहजणयं ।
तह वासं च महग्घं दोसिय कडिल्लम्ह पडिहाइ ॥ १८८ ॥

प्रियोल्लास—पद्धतिः।

एकेन विना प्रियमानुषेण बहूनि भवन्ति दुःखानि।
आलस्यं रणरणकोऽनिद्रा पुलकः ससाध्वसः॥ ७८०॥
एकेन विना प्रियमानुषेण सद्भावस्नेहभृतेन।
जनसङ्कुलापि पृथ्व्यहोऽरण्यमिव प्रतिभाति॥ ७८१॥
स कुत्र गतः स सुजनवल्लभः स सुखानां शतखानिः।
स मदनाग्निविनाशकः स स शोषयति मम हृदयं॥ ७८२॥
स भविष्यति कोऽपि दिवसो यत्र प्रियो बाहुपञ्जरविलीनः।
रतिरभसखेदखिन्नः प्रचरति प्रवासदुःखानि॥ ७८३॥
आगमिष्यति प्रियः चुम्बिष्यति निष्ठुरं चुम्बित्वा प्रच्छ्यति॥
दयिते कुशलेति त्वं नमो नमस्तेभ्यो दिवसेभ्यः॥ ७८४॥
धन्यं तदेव दिनं सा रजनी सकललक्षणसंपूर्णा।
अमृतं सोऽपि मुहूर्तो यत्र प्रियो झटिति दृश्यते॥ ७८५॥
दूरतरदेशपरिसंस्थितस्य प्रियसङ्गमं महतः।
आशाबन्ध एव मानुषस्यावलम्बते जीवं॥ ७८६॥
हृदयस्थितोऽपि सुभगस्तथापि खलु नयनयोर्भवति दृष्प्रेक्षः
प्रेक्षत विधिना न कृता मम हृदये जालकगवाक्षाः॥ ७८७॥

दोसिय—पद्धतिः।

दीर्घं श्लक्ष्णं बहुसूत्रविपुलं कटितले सुखजनकं।
तथा वासस्य महार्घं दोसियाधोवस्त्रमस्मभ्यं प्रतिभाति॥ ७८८॥

माणविहूणं इन्दो — व्व छोडयं सिलधोयगयछायं
जं वसणं न सुहावइ सुय दूरं नमयाउ तं ॥ ७८९ ॥
पम्मुहसुत्तं अट्टी — सुहावयं जणियरायपुलइल्लं ।
होसिय दिज्जन्तं पि हु नारङ्गं अम्ह पडिहाइ ॥ ७९० ॥
जं परकालियसारं जं गहयं चेव खममहग्घं च ।
तं होसिय अम्हाणं दंसिज्जउ किं वियारेण ॥ ७९१ ॥
होसिय घणगुणसारं सुविणीयं सुट्ठु मोहसंजणयं ।
दंसहि मा कुण खेयं तं अम्ह जणेइ परिओसं ॥ ७९२ ॥
जइ पढमे तइ दीसइ अवमाणे माउयस्स निव्वहणं ।
तं फुडु अम्ह नियम्बे होसिय फुट्टं पि पडिहाइ ॥ ७९३ ॥

इय कइयणेहि रइए वज्जालए सयललोयभिट्ठिए ।
पत्थावे गोट्टिट्ठिय — इच्छियगाहा पढिज्जन्ति ॥ ७९४ ॥
एयं वज्जालग्गं ठाणं गहिऊण पढइ जो को वि ।
नियठाणे पत्थावे गुरुत्तणं लहइ सो पुरिसो ॥ ७९५ ॥

———

मानविहीनं रुद्रत्वेन हृत्वं शिलाधौतगतच्छायं ।
यद्वसनं न सुखयति मुञ्च दूरं नर्मदातटे तत् ॥ ७८९ ॥
प्राङ्मुखसूत्रमस्थिसुखजनकं जनितरागपुलकितं ।
दोषिय दीयमानमपि खलु नारङ्गमस्मभ्यं प्रतिभाति ॥ ७९० ॥
यत्प्रचालितसारं यद्दुष्कं चैव महद्महार्घं च ।
तद्दर्शतां दोषियास्मभ्यं किं विचारेण ॥ ७९१ ॥
दोषिय घनगुणसारं सुविनीतं सुष्टु शोभासंजनकं ।
दर्शय मा कुरु खेदं तदस्माकं जनयति परितोषं ॥ ७९२ ॥
यथा प्रथमे तथा दृश्यतेऽवसाने शाटकस्य निर्वहणं ।
तत्स्फुटमस्मभ्यं नितम्बे दोषिय स्फुटितमपि प्रतिभाति ॥ ७९३ ॥

इति कविजने रचिते वज्जालये सकललोकाभीष्टे ।
प्रस्तावे गोष्ठीस्थितेष्वितगाथाः पद्यन्ते ॥ ७९४ ॥
इदं वज्जालग्गं स्थानं गृहीत्वा पठति यः कोऽपि ।
निजस्थाने प्रस्तावे गुरुत्वं लभते स पुरुषः ॥ ७९५ ॥

EXTRACTS FROM THE COMMENTARY.

१ श्रुतदेवतां सरस्वतीं । सर्वज्ञो जिनः ।

१ २ सच्छन्दिया गाथापक्षे छन्दःशास्त्रं तत्सहिता कामिनी-पक्षे छन्दानुवर्तनं गाहिज्जन्ती पठ्यमानानुभूयमाना च ।

१ ६ यथेक्षुयष्टिर्भक्ष्यमाणा लघूभवति तथा सर्वेण पठ्यमाना गाथा लघूभवति सर्वाक्षरानुच्चरणात् ।

१ ७ एतेषां रसमजानाना दैवहतका उदरभारयो वेधयाः ।

१ ८ छन्दं छन्दःशास्त्रं पक्षे छन्दानुवर्तनं ।

२ १ पूरणगुणसहितार्थानां कर्तरि षष्ठी तेनोदकेन तृप्तिं न व्रजामः ।

२ ३ किमपि चिन्तयन् कथं सकलं वृत्तं निधास्यामि कथमितोऽर्थं गृहीत्वा यास्यामि ।

२ ४ छन्दं छन्दानुवर्तने च ।

२ ८ संस्कृतादपि प्राकृतमतिरिच्यते आबालगोपालप्रसिद्धत्वा-त्सुगमत्वाच्च तस्य ।

३ ० मूर्खात्मनोऽज्ञतया छन्दोलक्षणविहीनं गाथादिकं पठतो ऽवलोक्य पण्डिता अक्षिनिकोचनेन तानुपहसन्ति ।

४ ३ दृढमवैतिह्यं यथा केसरिणि सति मत्तस्यापि हस्तिनो विस्फूर्जितं न विलसति तथा सत्पुरुषे भुवनमलंकुर्वति कलिकालविलसितं न परिस्फुरति ।

४ ६ अथ कथमपि प्रतिपद्यन्ते तदा दुःखैः कृच्छ्रेण तेषां प्रतिपत्तिः प्रस्तररेखासमा ।

४ ७ उक्तं च दिग्गजकमठकुलाचलफणिपतिविधृतापि चलति वसुधेयं प्रतिपन्नममलमनसां न चलति पुंसां युगान्तेऽपि ।

४ ८ यथा चन्दनतरुर्निष्फलस्तथापि निजशरीरपेषणपङ्केन दाघार्तानां तापोपशान्तये भवति तद्वद् दुर्गतोऽपि सुजनो दुःखितानां लोकानां निजशरीरेण ।

५ १ नखमांसभेदजनको द्वयोरपि प्रीत्या मिलितयोर्नखमांसयोरिव भेदनं वियोजनं जनयतीति जनको ? दुर्मुखः पश्चादन्यत्पुरश्चान्यद्वादी — मध्या वलितश्छिन्नवक्रः — भेदनं छेदनं — मध्यावलितो मध्ये वक्रीकृतः ?

५ २ अकुलीनो जारजातो द्विमुखो द्विजिह्वः — यावदेव भोजनादि दीयते तावन्मधुरो दृष्टः — अकुलीनोऽस्पृष्टभूमिर्यतोऽङ्के धृत्वा वाह्यते ।

५ ३ निर्धर्मो धर्मशब्देन धनुरुच्यते — स्थानानि आलीढवैशाखप्रत्यालीढादीनि ।

५ ४ अयमत्र भावो यत्कदाचित्किंचिन्न संघटते तद्घटमानमिव साक्षाज्जल्पन्ति ।

५ ७ परस्य विवरं छिद्रं तत्र लक्ष्यलक्षे पक्षे परविवरं अन्येन मूषकादिना कृतं विवरं — वङ्कपरि॰ सौकृगत्यर्थो वक्रगमनशीले ।

५ ८ असमर्थानि मन्त्रतन्त्राणि येषु ते — अकुलीनेभ्यः पक्षेऽष्टौ नागानां कुलानि तद्व्यतिरिक्तेभ्यः — निःफणेभ्यः ।

६ १ शुनकपक्षे निर्वर्तितं कार्यं सुरतं तत्र पराङ्मुखानां

स्वभाव एव तेषां क्रतसुरता योनिस्थितमेहना अपि पराङ्मुखा भवन्ति।

१० यथा हर: सप्तभुवनाधिपतिर्हस्त्यश्वादि परिहृत्यागतं वृषभमङ्गीचकार तथा निर्गुणं सगुणमपि पुरुषं महान प्रतिपद्यत इति।

९५ समाप्यन्ते म्रियन्ते।

११६ विधिना पुराक्रतकर्मणा।

१३५ अयं याचको मामपि याचिष्यते नीत: सन्निति न नीयते।

१४५ सुन्दर एयमिति पाठ:।

१४६ पङ्कजनीलां कमलसादृश्यं। विकसति विकासं लभते हस्तपादं प्रसारयति शीताभावात्।

१४७ सुपत्त्राणि विदुष:।

१५३ उक्तं च यत:। सेवया धनमिच्छद्भि: सेवकै: पश्य यत्क्रतं।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितं॥

१५५ तालस्य शतवर्षे यावदेकदा फलति।

१५८ अयमत्र भाव:। क्रष्णमलिनचित्ता: प्रभोरभ्यन्तरस्थिता विभवजातं भुञ्जते, ये पुन: शुद्धस्वभावास्ते बहि: स्थिता एव केवलं क्लेशमनुभवन्ति।

१६० सेवया पर्याप्तं। अयं भाव: धेनुवृषभरालेकधान्येषु विद्यमानेषु सेवयालं।

१७२ उक्तं च। एक्को पाउ पयाले बीओ वंभंडमंडलविलग्गो।
तइओ रोमफुरंतो बलिबंधे वामणो जयउ॥

१७८ संचूर्णितश्चासौ विस्तीर्णक्षोभश्चेति कर्मधारयः।

१८७ सा रेवा नर्मदा। करिणीसंघाता गणिकारिकावृन्दानि।

१९८ सृत इत्यध्याहार्यं।

२१० नन्दने वने। मरुविलसितानि कण्टकिजालभक्षणानि।

२०५ कश्चन युवा कांचनापूर्वां तरुणीमवलोक्य विरुद्धामपि पूर्वं-रमितामनाकलय्य तामलभमानः शिरो धूनयति धूत्करोति च। तं तादृशमवलोक्य सा रूपवती सखीं प्रति ब्रूते।

२२६ इयं मत्सखी रन्तुं सौभाग्ययुक्तैरपि युवभिर्न प्राप्ते लज्जाग्याच्च स्वयमप्यागतामिमां किमित्यवगणयसि यदन्यामवलोकयसि, को नाम तवाग्रह इति ध्वन्यते।

२२७ भावार्थस्त्वयं। कांचन नायिकामागत्य दूती वक्ति हे सखीमण्डलस्थितयुवप्रार्थनीये सौभाग्यवति त्वद्विरहे सकलमपि युवजातं तथा तानवमालम्बते यथा द्वित्रेषु दिनेष्वनिष्टभाग्भविष्यतीति।

२२८ भावार्थः पुनरेषः। हे तामरसाक्षि निर्भरयौवनरमणीये भवतीं सर्वावयवरूढप्रौढयौवनामवलोक्य सर्वेऽपि युवानस्त्वामेवाहमहमिकया वाञ्छन्तु भविष्यत्प्रौढतारुण्यारूढां नायिकां प्रति सखीवाक्यमिति।

२२९ अयमभिप्रायो; भवन्तु सर्वा अपि स्त्रियो, यूनः पुनः कस्यचित्कर्णान्तविश्रान्तलोचना कुचयुगलपीड्यमानचिबुका चम्पककलिकागौराङ्ग्यवतीर्णतारुण्या युवती रणरणकहेतुर्भवति।

२३० अयं भावः। कश्चिद्युवानवतीर्णतारुण्यां नायिकां दृष्ट्वा तामवाप्तुं तत्सख्योच्यते। हे युवन् किं पराङ्मुख संजातो ऽस्यस्याः? स कोऽपि यौवनभरः समुल्लसिष्यति येन सकलनगरनारीरप्यतिशेष्यत इति।

२३१ अयं भावः। कश्चन युवासंपूर्णकुचयुगलां मुग्धां वामाक्षीमालोक्य तत्सख्योच्यत। अस्याः सुरतपाण्डित्येन गुणातिशयं ज्ञास्यस्येतां लघ्वीं मुग्धां मा ज्ञासीरिति।

२३४ भावोऽयं। काचन नारी सर्वाङ्गरूपवती सुभगा गर्वेण वक्ति। मद्रूपश्रियमवलोक्यायं युवा मामागच्छति तमेतं निवारयतु कश्चन यस्य शक्तिरस्ति।

२४२ अयं भावः। काचन नायिकानवतीर्णतारुण्यापि प्रियैः पातुमारब्धा।

२४७ अयं भावः। सकला अपि नारीर्देशंदेशं परिभ्रमति परमेकामपि न कामयते सर्वाङ्गसुन्दरीमलभमान, एवंस्थिते काचन वक्ति सर्वत्र परिभ्रमति परं क्वापि स्थितिं न विधत्तेऽयमित्युपालभ्यते; तदुपालम्भं श्रुत्वान्यः कश्चन ब्रूते यदि मनोगतां सर्वगुणपरिपूर्णां प्राप्नोति तर्हि न भ्राम्यतीत्यर्थः।

२४७ अयं भ्रमरः भ्रमन् रौतीति भ्रमर इति।

२५० अयमर्थो यथा कश्चन युवातिक्रान्ततारुण्यामपि गुणगणयुक्तां नारीं प्रथमोपभुक्तां न त्यजति।

२५२ यथा कश्चित्कामुकः कांचनानवतीर्णतारुण्यां कयाचन युक्त्या सुरतक्षमां विधाय तामुपभुङ्क्ते स निपुणो भवेत्

२५३ अयं भावः प्रधानस्थितां निबिडकुचयुगलभरभज्यमानमध्यां मध्यवयसं नारीं रमिलेदानीं चेतरनारीं कामयमानो न लज्जसे हे युवन्नित्युपालम्भोक्तिः।

२५४ सर्वगुणपरिपूर्णायाः कर्णान्तविश्रान्तलोचनायाः सुरतेन सुखीकृतहृदयस्य यूनो हृदयं सामान्यनारीरतं यदा नानन्दयति तदा केनचिदेवमुच्यते।

२५६ संकल्पो नियमः।

२५७ अयमभिप्रायो; यथा कश्चिद्विपश्चित्प्रकाण्डः सकलपरिषन्मण्डनभूतः सज्जनशिरोमणिर्दुर्जनसंसन्मध्यगतः केनचिदेवमुच्यते।

२६१ इयं शृङ्गारे वर्तते यथा कश्चन युवा कांचन विदग्धवनितां चलच्चमूरुचक्षुषमुपभुज्य निकृष्टां कामयमानः केनचित्सख्यैवमुच्यते।

२६५ यथा यथा पुमानर्थेन गुणगणेन परिपूर्णो भवति तथा तथा गर्वायत इति निर्मदो भाग्यवानेको न तु सर्वे लक्ष्मीपूरिता इति।

२६७ महतां हानिवृद्धी भवतः क्षुद्राणां सर्वदा लघूनां हानिरेवेत्यर्थः।

२७२ जल्पितुं जानात्यर्थाद्वक्रभणितीः।

२८६ वरतरुणीकर्णलग्नेन कर्णान्तविश्रान्तेन पुनः कथंभूतेन घोलन्ती तारा कनीनिकाया वर्णस्तेनोज्ज्वलं तेन तथा।

२०१ यथा दरिद्रचिन्ता हृदये न माति दुर्गतमनोरथा बहवोऽपि निष्फला भवन्तीत्यर्थः।

२१६ अन्यदपि पानीयादि भिन्नानि स्थानानि संपूर्णत्वात्योद्धूतं सदितः प्रसरतीति।

२९१ अयं भावः। स्वभावसुरते वलयनूपुरयो रवौ न संगच्छेते अतः कारणाद् द्वावपि श्रुत्वा कस्यापि धन्यस्य पुरुषायितं क्रियमाणं वर्तत इत्यनुमीयते।

२९७ यथा पाण्डवकौरवौ युद्धोद्यतौ किमपि न गणयतस्तथा सुरतसंमर्दनौ दम्पती।

२४४ इदमत्र तत्त्वं। काचिन्नारी कस्मिंश्चिद्दुर्लभेऽनुरक्ता तमलभमाना मानमवलम्ब्य पुनरन्यं वाञ्छन्ती पुनस्तत्रै-वानुरक्ता सती जनान् हासयति।

२५० सखीशिक्षोक्तिरियमथवा भर्तुः कृतापराधस्य।

२५१ अयं भावः। कश्चिद्युवा कांचन स्त्रियं गते दिवस उपभुज्य द्वितीयदिनरात्रौ मानमवलम्ब्य स्थितां वामाचौं मद्य-पात्रपुष्पाद्युपभोगवस्तानीय तामनुनयन्निदमाह।

२५२ इति सखीशिक्षोक्तिर्नायिकां प्रति।

२५५ गजेन्द्रतुल्यौ मानभर्तारौ प्रतीहि इति सखीशिक्षोक्तिः।

२५६ तुला जलोद्वहनघटीकाष्ठदवरकं यस्याग्रे ढेङ्कुलीति कथ्यते।

२७१ शशिनो वाहनमीश्वरस्तस्य वाहनं वृषभः। शैलसुतायाः पार्वत्याः सुतः षण्मुखस्तस्य वाहनं मयूरः। प्रावृट्काले।

३७१ त्वत्प्रिया वास: कमलं तस्य वास: पानीयं।

३७४ अयं भाव:। काचिन्नारी तत्क्षणादेव प्रवसितं प्रियं दृष्ट्वा विरहासहत्वात्प्रलपितुमिदमारब्धवती। तस्मिन् मत्प्रिये प्रोषिते अनस्याद्योज्जागर: चौरभयत्वात् तेन सुभटेन विना को नाम रक्षां करोत्यद्यैव हरिद्रापिञ्जराणि गोदावर्यास्तटानि तस्मिन् सति सर्वा अपि नार्य आत्मवपूंषि हरिद्रापिञ्जराणि प्रत्यहं चक्रुरिदानीं च तस्मिन् प्रोषिते किमनेन हरिद्रारागेणास्माकमिति गोदावर्यां तत्क्षणादेव गत्वाक्षालयन्निति नदीतटपीतत्वं, तूहं तटं।

३७५ अयं भाव:। पूर्वं नगरनार्यस्तद्रूपं दिदृक्षालालसा: सत्यो यत्र यत्र गमनागमनं स मत्प्रियो विधत्ते स्म तत्र तत्रैव रथ्यामुखदेवकुलचत्वरस्थादावेवागत्यास्थुरिदानीं तु तस्मिन् प्रोषिते हृदयेन साकं शून्यान्यभूवन्निति निजपुरुषस्य रूपसौभाग्यप्रकटनोक्ति:।

३७६ तस्यास्तेन पत्या विना रक्तसितासितप्रान्तमध्ये नयने सर्वत्र परिभ्रमत: परं क्वापि न पश्यतो; मौक्तिकमपि कूटत्यक्तं सत्सर्वत्र पतितं न कोऽपि गृह्णाति।

३८१ अद्य विरह उभययापि समाप्तिं यास्यति; यदि प्रियो ऽद्यागात् तर्हि दिष्ट्या मण्डनं, उत नायासीत् तदान्य-मण्डनं भावीति।

३९३ कुलबालिका: कामं हृद्येव मारयन्तीति भाव:।

३ ८ ७ अयं भावः । तावदेव कामः स्वपरवशौ दम्पती मारयति यावत्कामिनीकटाक्षबाणपूरिताङ्गो न भवति ; पश्चात्सोऽपि तादृग्विधः खैरेव बाणैर्मार्यते प्रत्युतेति ।

४ १ १ यं सुभगयुवावतंसं सर्वा अपि नार्यो दूतीः प्रेषयित्वा प्रत्यहं कामयन्ते तत्र मादृशो जनस्य मानवैरी कथमवकाशं लभतामिति ।

४ १ ३ तथा त्वं कुर्या यथा स्वयमेव प्रियमपि संसारेऽप्येति लघुतां यथा न यासि कार्यं च यथा सिध्यतीति कण्डूयितपाण्डुरं यथा न संपद्यत इति ।

४ १ ४ मम भर्तुः परसहस्रापराधास्तेषु सत्सु यदि मानमवलम्बेयं तर्हि शरीरस्थेयमवस्थातः कारणादेवंविधे व्यतिकरे त्वमेव मम शरणं, येन केन प्रकारेण स आगच्छति तद्विदधीथा इति भावः ।

४ १ ७ यस्तव वचनं न खण्डिष्यते तवादेशं करिष्यति । कयाचित्स्त्रिया प्रेषिता दूती प्रियं प्रति तद्दैव तेन सह सुरतसुखमनुभूय खण्डिताधरैवंविधं मुखं कथं दर्शयामीत्यधोमुख्यागतवती तां च तथाविधामवलोक्य सान्तःभिन्ना हे सखि कथमधोमुखी भवसि यस्त्वद्वदनोष्ठं खण्डयति स मम प्रियः त्वां सेवमानो मम वैरीति भावः ।

४ १ २ ०विकटकटिस्थलप्रस्तुत० ।

४ ४ ५ जीवन्तीं मृतां वा प्राणेश्वरीं द्रक्ष्यामीति हृदये संशयाः ।

४ ५ ० काचित्खण्डिता मानमवलम्बमाना विरहावस्थामसहमाना च खहृदयं संवृणोति ।

४ ५ १ काचित्कंचन वाञ्छन्ती तेनाप्यवगणिता हृदयं प्रतीदमाहेति ।

४ ५ ८ B अप्राप्तबलिदाने वल्लभागमनसूचके चुधार्ते उड्डीने । C. E. G. अयं भावो वल्लभागमनार्थं पृष्टः काकः किल खरचेष्टाविशेषेण तदागमनं शकुनमवकथयति । तत्पूजार्थं बल्यर्थं तत्किमपि नास्ति येन बलिं संपाद्य तस्मै निवेदयति । पश्चात्तस्मिन्नुड्डीने ऽहोऽहं दुर्भगशिरोमणिर्यदस्मै प्रियशकुनसूचकाय कवलमपि न न्यवेदयमिति तारतारं रुरोद ।

४ ६ ० वायसमागतं वीक्ष्य प्रोषितपतिभार्याचाद्य स्त्रिय एवं कुर्वन्तीति तासां स्वभावः ।

४ ६ १ क्वायां शोभां मम पत्युर्दारिद्र्येण भोजनादिपूजामकुर्वती मानहानिस्तेषु बान्धवेष्वागतेषु मा भूदिति तानपि द्वेष्टि ।

४ ६ ८ अयमर्थः । काचन दूती केनचित्पुरुषेण प्रेरिता सतीमतल्लिकामागत्यामुकं भजस्वेत्युक्तवती तां चैव ब्रुवाणां प्रत्युत्तरयति ।

४ ७ ० मम गुणान् बहु मन्यतेऽहं चासती भवेयं यदि तदा मम क इमे गुणाः ।

४ ७ १ काचन सत्यसावुत्तमस्त्वद्गुणान् बहु मन्यत इति ब्रुवाणां दूतीं प्रत्युत्तरयति ।

४ ७ ७ अन्यद्व्याख्यानान्तरमीदृशीनां गाथानां श्रीत्रिभुवनपाल-
विवृतितश्छेकोक्तिविचारलीलायां ज्ञेय यत इह
(ऽत्र E) लेखक एव ।

४ ८ १ कर्णे लगित्वेत्यर्थः ।

४ ८ ८ पत्रिकामपि मा दद्याः पूजां मा कृथाः ।

४ ९ ० काचन स्वैरिणी कूपान्तःस्थां चन्द्रप्रतिमामवलोक्य
सखीमुवाचेति कज्जलेनामुं मलिनं कुरु येन ज्योत्स्नाजालं
न विकिरति ।

४ ९ २ अयं भावः। श्वश्रूस्तावन्न पश्यति न शृणोति ग्रामलोकस्य
गृहे विवाहव्यग्रो मम पतिश्चात्र नास्ति तस्मात्सर्वतोऽपि
भीतं परित्यज्य सकलां रात्रिमारमस्वेति भङ्ग्योक्तवती
काचन कुलटा ।

४ ९ ७ भावार्थस्त्वयं । हे पथिक एतत्स्थानं जनसंकुलं न वर्तते
शून्यमेवात्ता न रुध्यति ददाति स्वप्नमवकाशं तदा मा
व्रज किं तु वासं याचस्वात्र मम गृहे ।

४ ९ ५ कोऽर्थः । यद्यत्र वत्स्यसे तदा मत्कुचोष्मणा गतशीतो
गतामपि रात्रिं न ज्ञास्यस इत्यर्थः ।

४ ९ ९ करणानि ववबालवादीनि सप्त । त्वं तथा कुर्वीथा
यथा शुक्रो निस्वलः स्यादिति ।

५ ० ७ संचारः कोकप्रणीतोऽत्र बोद्धव्यो ग्रन्थगौरवभयान्न
लिख्यते ऽत्रेति ।

५ ० ८ कश्चन यभ्मुमनिपुणः कयाचिन्नायिकयैवमुच्यते ।

१ ३ २ सात्त्विकभावभावितप्रस्रवद्रवत्पानीयानि कन्यकारतानि।

१ ४ १ अयं भावः। सर्वमपि ग्रामं परिभ्रान्तास्मि परमात्मभगयोग्यं कस्यापि साधनं न दृष्टं।

१ ४ ४ काचन खण्डिता या मानमवलम्ब्य यावत्तिष्ठति तावदागत्य भर्त्रानुनीतापि मानं न तत्याज गतः सोऽपि निजगृहे। एवंविधे व्यतिकरे कामपरवशा यावन्न पतिर्मानं त्यजति तावद्रोदितुं प्रवृत्ता सती सख्योच्यत एवमिति।

१ ४ ६ त्वद्रोदनेनैतेषां छेकानां मनो नो द्रवते प्रत्युत कृतकरोदनेन मां प्रतारयत्येषेति मन्यन्ते।

१ ४ ८ दिनकरकिरणपक्षे दोषा रात्रिर्यैस्ते।

१ ५ १ रक्ते ऽनुरक्ते जने रक्ता कृष्णे दुष्टहृदये कृष्णा धवले शुद्धहृदये धवलाः।

१ ६ ० सुकविरर्थो ऽभिधेयस्तत्र लुब्धः। दृष्ट्वा दूरत एव।

१ ६ १ वर्णाढ्या सुरूपा। पक्षे वर्णाढ्या पीतच्छविलात्। सुखे रसिका आगच्छ प्राणनाथ मां दासीं किमिति दृशापि न संभावयसीति। पक्षे सुखरसिका भक्ष्यमाणा स्वादुर्भवति। स्नेहविहीनापि कण्ठे लगति कृत्रिमप्रेमप्रकटनात्। पक्षे तैलादिरहिता कण्ठे तालुनि लगत्यतिरूक्षत्वात्। पश्चात्करोति विकारं निर्द्रव्यं पुरुषं कृत्वा विकारं कुर्वन्ति वेश्या निष्काम-

यन्तीत्यर्थः । पक्षे पश्चाद्विकारमुदरागमने ऽजीर्णाति-
सारादिकं करोति ।

५ ६ ४ न संवहति न वशीभवति । संजातरोमाञ्चेनाङ्गेन पर-
द्रव्यं दृष्ट्वोत्कण्ठितशरीरा ।

५ ६ ५ निबद्धलोभा । पक्षे प्राकृते पूर्वनिपातो लोहेन निबद्धा ।
स्थानमेव लोभ एव वित्तं लोभद्रव्यं ।

५ ६ ७ नानजनरागि । पक्षे ऽन्योन्यं योऽसौ रागः पञ्चवर्णत्वात् ।

५ ६ ८ आत्मानं द्रव्यलोभेन कुष्ठिने ऽप्यर्पयन्ति ।

५ ७ १ यद्यात्मा द्वेष्यो न भवेत् ततः कुरूपान् कुष्ठिनोऽपि
कथं भजन्ति ।

५ ७ ६ यथा शैवाललिप्तप्रस्तरपतनं दुःखाय संपद्यते तथा
वेश्याहृदयविश्रामः ।

५ ७ ७ मृतकमात्मवशीभूतं मृतकप्रायमिव । अन्यं चाजिगमिषुं
व्यसनिनं कटाक्षरक्षितं धारयति । असौ धनी यद्या-
गच्छति तदात्मवशमानयामीति दृष्टिं ददाति । पक्षे
ऽन्यस्य च दृष्टिं ददाति श्वः परश्वः कं मृतकं
भक्षयिष्यामि ।

५ ७ ८ ग्रन्थमर्थं मोक्षं तस्माद्भ्रमनिनो ध्यायन्ति । कवलित-
हस्ता कवलितुमेव भक्षयितुमेव हस्तो यस्याः सा । ग्रन्थं
शास्त्रं । मोक्षं शिवं ध्यायन्ति । तद्गतमनसः तस्मिन्
मोक्ष एव गतं मनो येषां ते ।

५ ८ ० विद्यमानमपि धनं लोपयितुं कथं शक्यत इति भावः ।

५८६ उड्डो तडागखनकः। भूमावतिगमने। यथा कामी साधनं विनिक्षिप्य द्वे तस्यौ भगस्य विलिख्य हृदयेप्सितं पानीयमानयति द्रावयतीत्यर्थः।

५८८ यथा कश्चन कामुकः लब्धस्पर्शसुखो निर्दयालिङ्गनबङ्ग-लोच्छलद्रेतसं नारीं द्रवीभूतामपि पुनरालिङ्गति।

५८९ नारी द्वादशाङ्गुलप्रमाणलिङ्गदृढघातेन यत्प्रद्रवति तन्ना-श्चर्यकारि। यस्य दर्शनेनैव द्रवति स कामुकः कुशलः।

५९० काञ्चन गोपबालिकां राधानाम्ना हरिरालपते स्म कुशलं राधे। तर्हि सा क्रोधाविष्टा सुखितोऽसि कंसेति हरिं प्रत्यवादीत्। ततो भगवान् चमत्कारं परावृत्य कंसः क्वेति पप्रच्छ। ततः सा राधिकापि क्वास्तेऽत्रेति प्रत्युत्तरमदादिति।

५९१ द्वावप्येतौ यमुनायां चिरं विक्रीडतुर्येषु दिवसेषु ते तादृशा दिवसास्तदानीमभूवन् न तु इदानीमिति।

५९४ काचन गोप्यन्या कस्याश्चित्कृष्णविरहिताया: कृष्णलाभो-पायं निवेदयति।

५९५ विशाखेतेन दानवारेर्नारायणसुभटप्रकाण्डस्य वल्लभा-स्मीति गर्वायते स्म।

५९६ कयाचिद्गोप्या।

५९७ भगवति गतचित्ता धवलमपि तक्रं कृष्णमिति भगवतो नाम गृह्णाति।

६०० रुचिरं वस्तु यथा २ भुज्यते तथा २ तृष्णा वर्धतेतरां।

६०१ खलया गौर्यूरुमूलनितम्बबिम्बकुचयुगलादि दृष्ट्वरीश्वरो यन्थिच्छोटनमकार्षीत्तस्मिंश्च कृते मा ममाङ्गयष्टिमसौ पश्यत्विति ।

६११ लक्ष्मीः किल कामार्ता ब्रह्माणमपि नाभीकमलस्थितं दृष्ट्वा सुरतसुखं त्यक्तुमपारयन्ती लज्जामज्जद्वदनकमला कथममी परमेष्ठी मामेवंकुर्वाणां द्रक्ष्यतीत्यस्य भगवतो नयनद्वयी किल सूर्यचन्द्रमसौ तर्हि यत्र सूर्यस्तत्र कमलं विकसति तस्मिंश्चास्तमयमाने पयोजमपि संकुचत्यतो नाभीपयोरुहं नारायणदक्षिणनयनसूर्या-च्छादनेन संकुचत्विति नयनं पिदधे भगवत्युदधिजेति ।

६१२ एतावता सापराधो भवानसि ।

६१३ इदमुत्तरं । मम मुखं तावत्कृतकौकर्पूरधूलिधवलं पूर्णिमाचन्द्रस्य मृगलक्ष्मदूषितस्ततो मम गण्डस्थले कुतस्त्यं कज्जलं लगति यन्मुखं मृगाङ्कलक्ष्मणानुमिमीत इयमिति ।

६१४ स्तनाभ्यां निरुद्धत्वादमुष्य ब्राह्मणस्य नमस्कारसूचकं शिरोनमनं मम न भवतीति । अमुना नितम्बेन दुर्वहेन मम त्वरितं गमनं न संगच्छते श्वशुरादेः स्पर्शः कथं रचितव्य इति ।

६१५ इदमुत्तरं । पतिस्तस्यास्तिलककरणव्याजेन मुखं चुचुम्बि-षति मा चेदानीमहमृतुमत्यस्मि पश्य रुधिराक्तं मम वासमिति पराङ्मुखी भवति ।

६१६ अस्य हृदयेऽन्या निवसति तस्याः पादप्रहारमसौ सहिष्यते नो वेति यावदुत्थापयति प्रहर्तुं पादं तावच्छिरसि प्रत्येच्छत्ततस्तथेति नान्यथा मम शङ्केति किं करोमीति स्थूलाश्रुभी रुरोद यतः रुदितमुचितमस्त्रं योषितां विग्रहेषु ।

६१७ परिजनमध्यस्थितं पूर्वमेव याचितसुरतमात्मवल्लभमवलोक्य कथं प्रत्युत्तरयामीति करकमलकलितं लीलानलिनं मुकुलयामास सूर्यास्तमनेऽस्मिन् मुकुलीभविष्यन्ति ततः परतस्त्वया ममागन्तव्यमिति कमलमुकुलने हेतुः ।

६१८ एकेनैव बाणेन वरगजेन्द्रहनने मम शक्तिरस्ति मा जानातु कोऽपि विषाक्तेन शरेणामुं मत्तहस्तिनं जघानेति शरप्रक्षालनपिबनं प्रत्ययाय विषाक्ते शरजले पीते ममैव मृत्युर्भवति ।

६१९ कुङ्कुमरागोऽप्यङ्गस्पर्शसुखान्तरायायावयोर्मा भूदिति ।

६२० एतेन तस्याः सर्वबन्धवेत्तृत्वं प्रकटीक्रियते ।

६२१ अभिनवप्रेमसमागमदयोरपि यौवनर्द्धिवसन्तमासे सति कथमसौ वृषभो नो वा यदेवंविधां मां परित्यज्य याति देशान्तरमिति शृङ्गावस्य शिरसि स्तो नो वेति शिरोऽवलोकनं ।

६२२ कौचिद्राजपुत्रौ विद्येते तयोः कनिष्ठेन प्रजावती राजकुले मद्भ्रातुः स्थाने त्वं भजेत्युक्ता सतौ अद्यामुना देवरेण विपरीतरतं मम शय्याप्रच्छादनपटस्थित-

चरणकुङ्कुमलाञ्छनेन ज्ञात्वा मद्वात:कार्यं त्वया कृत मित्यज्ञासीत् ।

६०३ प्रियस्य तावन्मम हृदये वासस्तत्र दीपक: कथं दीयत इति हृदयावलोकनं ।

६०४ आभिर्मम भर्ता रन्तुं याचितस्तत: ता: सुभगा अहं नपुंसकोऽस्मीत्युत्तरं चक्रे । ततो धन्याहमिति यस्या भर्तान्यां न कामयत इति गर्वमुवाह ।

६२५ प्रावृट्काले हि प्रवासकपथिकौ दु:खितौ भवत: ।

६२८ प्रेमारूढं वचनेनैव कमलनालवत्त्रुट्यत्यतिकोमलत्वात् ।

६३८ काचिद्विरहिणीसवृत्तमुद्दा पश्चात्तस्मिन्वर्धमाने प्रलपति । स धारो महाधारत्वं । शोषयति मम ।

६४८ काचिन्मुग्धा विरहिणी निरन्तरं वर्षति वारिदे सरित्सूभयकूलंकषासु सतीष्वात्मीयप्राणेश्वरस्य गमनं वाञ्छन्ती कयाचित्सख्यैवमुच्यते ।

५३ यथा कस्मिंश्चित्प्रधानपुरुषे विनष्टे शोकात्तनुतनुकृशादयो भवन्ति तत्परिवारस्य ।

६५४ शुकशरीरस्य हरितत्वेन चञ्चोश्च लौहित्येन सलोहितं पित्तमिवोत्प्रेक्ष्यते ।

६६४ पूर्वं हि जरा कर्णमूलमेव समागच्छति ।

६७४ विधिना पूर्वकृतकर्मणा ।

६७८ यत्रोत्पन्नं वस्तु तत्र तथा न शोभते यथान्यत्र स्थाने शोभतेतरां ।

७०३ कूपस्थितनुला रिक्तभूता मती नीचोच्चस्थानं प्राप्नोति ।

७०६ कोशोऽत्र कमलान्तरवर्त्तिनी कर्णिका ।

७१४ यः खलु लक्ष्म्यालिङ्गितः स यद्यात्मीयान् प्रति निःफलः स परान् प्रति कथं सफलो भविष्यति ।

७१८ कश्चिन्मनस्वी क्वापि मूर्खप्रधाने ग्रामे वसन् केनचिदेवमुच्यते ।

७१९ वरमन्यत्र गमनं विदुषो न तु मूर्खस्य क्रियमाणः सत्कारो दृष्टः ।

७२५ चक्रवाकः किलेयं मम प्राणवल्लभेति स्वकीयं प्रतिबिम्बं जलस्थितमवलोक्योदश्वसीत् ।

७३५ यद्यपि भूमिगुणेन वटवृक्षो ह्रस्वः संजातस्तथापि फलप्राचुर्यं तथा भविष्यति यथा सर्वेऽपि प्राणिनः सुखिता भविष्यन्ति ।

७३६ यः कोऽपि धनी भवति स वृद्धिं व्रजन् याच्यमानश्चेद्वदनचन्द्रं कोपकलङ्कितं विधत्ते तस्याशां याचकास्त्यजन्ति ।

७४० यः कोऽपि मुखं कलुषितं विधत्ते शुभवचनदानेऽप्यास्तां दानप्रस्तावः स स्वकीयैरेव पुत्रैस्त्यज्यते ।

७४४ कश्चिद्दुष्टो दौष्ट्यं तावत्करोति यावदन्यः सत्पुरुषः तन्निग्रहीता कोपाटोपभ्रुकुटिलतालंकृतललाटो न जानाति । तेन च ज्ञातेन तदानीं न दुष्टो न चान्यः कोपीति ।

७४६ यदि केनापि मूर्खशिरोमणिना ग्रामीणग्रामणिना

कश्चिद्विपश्चित्प्रकाण्डस्त्यक्तः सोऽन्यत्र गतः सकलनरनाथ-
मूर्धवन्दनीयचरणः किं न भविष्यतीति ।

७५० अपि तु शुनीव गृहे गृहे परिभ्रमति ।

७५१ यः कोऽपि पुरुषसिंहः कष्टदशामाप्तः केनापि याच्यमानः
संपत्त्यक्तोऽप्यात्मीयं गाम्भीर्यं न त्यजति ।

७५८ यथा कोऽपि वदान्यः पात्रेभ्यः सर्वमपि वस्तुजातं
विश्राण्य कस्मैचनावशिष्टयाचकायात्मानमर्पयन् सकल-
जगन्मण्डलं स्वयशसा पूरयति जीमूतवाहनवत् ।

७६१ यः कश्चिद्विभवप्राचुर्यनिर्जितधनदः परमद्दानः कमपि
स एवमुच्यते ।

७६५ बद्धोऽसि त्वं पर्वतैः पीतोऽसि त्वमगस्तिना तथा लङ्घितो-
ऽसि वानरादिभिः ।

७६८ मानी जनश्छेदनदाहघर्षणादिकं सहते न पुनरसमान-
जनेन सह साम्यं (read सहास्यां)।

७७० कश्चिदसमीक्ष्यकारी निरक्षरो लोभवान् स्वर्णेन नीचेन
समं सत्पुरुषं विद्वांसं करोति स एवमुच्यते ।

७७२ अमुष्मात्सुमेरोर्लवमपि सुवर्णं न लप्स्यसे ।

७७४ इतरलोकस्य कीटतुल्यस्य का गणना ।

७७८ विद्वांसः किल दीपच्छायां न गृह्णन्ति । दीपच्छाया
गजच्छाया खट्वाच्छाया तथैव चेति ।

७८८ एवंविधां स्त्रियमस्मभ्यं योजयेति गम्यं ।

७८९ कश्चन कास्येवंविधं स्त्रीरत्नमलभमानो यदि न प्राप्नोति तदैवं वक्ति ।

७९० सुसूक्ष्मस्निग्धस्पर्शसुखकारि जनितप्रीतिपुलकितं दीयमानमपि स्त्रीरत्नं रङ्गरहितं चेत्तदा यथा कस्यापि न रोचते तद्वदिदमपि ।

७९१ मान्यदर्शनेन खेदं कार्षीर्यतस्तत्तादृग्विधमस्माकं जनयति संतोषं ।

VARIOUS READINGS.

२ अमियं F— तत्तवत्तिं G—.

३ ०विरइयोओ गाहाओ कुलाउ A ; ०विरइयाइं D — एवं वज्जा-लग्गं विहियं A ; वज्जावग्गं B ; विज्जालग्गं D.

४ एगत्थे D— पवर० A— तं पिअ A ; तं पिऊ D — वग्गालग्गं B, F— पज्जत्ति D, F.

५ एवं A, G— अवसरे पत्ते A— पाईकव्व० A— होही A, D.

६ कए वि कव्वे D.

७ सक्कयअसक्कयं V, F.

१० मणोहराहिं D, F, H — मरसीहि च्छंदइत्तीहिं A— कामिणीहि A, H ; पणायणीहि V, F, उज्झइ हिययं A, D, H, भिज्जइ F, जिज्जइ G— अयंतीहिं A, C, D, E, F, G ; अमन्तीहिं H.

११ एवं B— जह दविणं पुसहीणेहि F, H ; जह दवणं पुस-हीणाणं D.

१२ छंदट्ठिया A— सुहवा C.

१३ रसं A— बिब्भमं A— वयणाइ A, D ; आलावा H— चित्तं A, C.

१४ पढइ विसत्थो य A, D — सुवणगुट्ठीए A ; सुयणगोट्ठीम् D— सु च्चिय नाओ छइल्लेहिं A ; सो उण नाओ छयल्लेहि D.

१५ हइ B ; हयइ D— अणाहा D, F— गमार० A, C ; गवाल० B ; गुयाल० D— किज्जइ A, D— लुंचविलुंची A— गावी H.

१६ लक्खवत्त A— पावहसि C, E— इक्क० A, F ; इच्छ० G.

१७ तं दंडं A— याणा A, F.

१८ कया A, D—रमणीया V, D, F—किं गाहाण ऊ A, D.

१९ अत्याते B—मुक्तवि० D.

२० पित D, F,

२१ ०कव्वस्स रमं A, D, F—जो जाणइ A, D, F. भणियाइं A, D—तावि(य)मीयलस्स तत्तिं A—पावेइ D.

२२ रणहि पयं A—चोर व्व A, B, C, D, G—दुक्खं घेत्तुण D, F.

२३ ०मोत्रो D, F, H—दुक्केण D, H.

२४ पुणोहि नवरि D—लभइ A, D.

२५ ०वऊल० B.

२६ सोहइ सो D, F, H—दुस्संतो E—कुपयं D, H.

२७ मुऊभंगुरो A, D; मुहउंचणो F; मुहवंचणो अचवलो विराओ B; विरावो C; यचवलो E.

२८ देसी० D—पढीयव्वं E.

२९ को सक्कायतडयडं पढइ A; सक्कयतिडितिडिं पढइ D—पढियं B, E.

३० अवुहा वुहाण B, C—०विहीणा D, F—भुव्वणगखग्गलग्गी? मीसं खलिअं न याणंति A; ते भउहा० B, C; ते भिमुहखग्ग-निव्वडियं पि D; ते भमुह० E, F; ते भउडि० H—न याणंति D, F, H.

३१ जेहिं A—ताणं पि ऊ नमिऊ हं A.

३२ सुवणो मुऊसहाओ A—मणं B; ममं C; महं असंभवो D, H—उप्पन्नो A.

३३ सुवणो A—दूमिज्जंतो वि D, H—इव D, H; च्चिय C, E, G, F—णिम्मलं जाइ A.

३४ विप्पियं A; अमंगलं G—लज्जयो A—भमइ A, D.

३५ सुवणस्स A—मुद्दा विप्पियं A.

३७ पियमहाइ A— एसो जाग सहाओ A. F— सुवगाग A.

३८ अकयत्थकयत्थकए A— अकयत्थए विप्पियं A: कइविप्पिए B.

३९ एम C; एमा E— पई A, H: पइई C— पिउं A, C, D. G— सयगस्स कात्ति पयई अपिए वि कए D, H— कुगइ A, D.

४१ पग्अवयारं A, V, D, F— अवराहेन A: अवयारोगा D, H.

४२ दोहेहिं वि F, G— पुज्जत्ता A— बज्रवेहि A— किं पि A— विज्जुफुरियं व B: ०फुरियो C; ०फुरिय व्व A; ०फुरिउं E: ०फुरिउ D; ०फुरियं F, H, G.

४३ गयंद० C, G— पुज्ञवो E.

४४ दीगो अब्भद्धरगां D, H— अब्भुद्धरियो A: अब्भुद्धरियं F— पिउं C, G— अवराहेसु D. H— खामिअं A; खमिओ F— सुवगं A; सुयगं D, H— नवर D— जागंति A, D, H.

४५ वि A; वे C, E; B (—): दो F— उवयरिउं E, G: जोयुवयारं न B— पुम्हसइ A: पम्हसइ E, G.

४६ मरणोग न A— हुंति A.

४७ अचला A— माजाया सायरं वि लंघंति A; मेल्हंति C— नेह A.

४८ फलरहिआ इ निम्मि० A— कुणंदि परकुं G— उवयारं A— लोयाणं A; लोयमुहं B, F; लोएसु C.

४९ वहक० A; बऊल० D, E, F: वहल B, C— हसियं दिट्ठं A: वियसियं दिट्ठं D.

५० घट्टो D, G; ठट्टो F— अजंपिरो A, D: अवंचिऊ C; अवंचिओ G— दुप्पिच्छो A, V, F, ०रिद्धीए D— सूलीभिन्न व्व A, सूलीदिन्न व्व V, F, सूलाभिन्नो व्व D.

५१ ०मंस० A, C, F— लोहट्ठिखंडगा० A— दुम्मुहउ E— भेइयगगो B.

५२ भायगं G— मुरज व्व V.

५३ व्व लोह० C, E, G : य अलोह० B—बाणो व्व D ; बाण व्व A, V, F.

५४ जस्स F—होहो D— जं पि F— तं पि य जंपंति फुडं D—सव्वमारिच्छं D.

५५ नवर B, E, G— विहवेण D.

५६ देंतं C, E ; दिंतयं D—अदिसुयं C, E—वेरियाणं D, F ; वयरियाणं E ; वइरिणं G.

५७ चित्तलए A, D, G—जमलि० B, F ; जुवल० A—सो घोण-सपिसुणो A ; घोणस व्व B, E ; गोणसप्पं F ; गोणस व्व C, D, G—परिसिरिकरे A ; पडिसकरे D.

५८ कुलविहूणाण भोयमुक्काण A, D—भोयवंताण H—वित्थाण B—वीहइ A, V, D, F, H—वंतर० D.

५९ एवं G.

६० खलमौहे H.

६१ चाडयंव?भरियाणं A ; बऊचाडकूड० D—सुणहाण F.

६२ जेणं D, H—उद्धरिया A ; निम्मविया D, H—जस्स D, H—लऊमाहप्पं A ; ०पभावा G—भमरा A ; मवरा F, H—दहंति D—थंभं A—मंगु चिय A.

६३ सुक्क० D, H, G—०मंमिलिआ A—खलसंगे संपत्ते A ; जाए D, H—सुवणो A ; सुयणा .... पाविंति D, H.

६४ गुणा इ को E—वसियं B—नवर B, E ; णवरे C.

६५ एक्क V ; इक्कं A—दिवहाण E ; दिणहाण B—जेहि जेहिं विणिहिट्ठो V.

६६ जुन्हं A ; दिएहि G—महइ A, B, D, G.

६७ मिलंतो B, E, G.

६९ उवहग्ग A, B, C, E—मिल्लेइ A: मिल्लेइ B, E—घोवमाणं G.

७० जं च C—पिच्छइ A, C, E.

७१ सप्पुरिसाण A.

७२ दढ० G—संकुलाण य A—कुलीणाणं A—°धो A.

७३ पुन्निमाइ A—तह A, D—°दुक्खाण? जए A; दुक्खाण? मणो B, C, F, G; दुक्खाइ जए D, H.

७४ इक्को वि A—नवर D—तिऊवणम्मि A—जुन्हाण A; जोन्हाए C—कोणो E.

७५ किज्जइ B; झिज्झइ D—खीणम्मि E—वड्ढइ वड्ढंत० G; वड्ढइ तह वड्ढियम्मि A: वड्ढइ उयहिंमि तह य D वड्ढइ इय उयंमि तह य H.

७६ घडणं जं जेण A, D—दैयस्स A: जीयस्स G—दूरत्थो वि D—खग्गडाणं C, E.

७७ इक्कमिल्लियाणं A—कुमुइ० G—°खंडाइं A.

७८ दिट्ठेण वि A, D—जाव न F—पाविंति D—विनिव्वुइ A: कुमुयाण निव्वुइ कुणइ D.

७९ एमेय D—कमलायराय B, F; कमलाइराणं C—रविणो A, H: रइविणा C—तेण B—वियसंति A; विहसंति H.

८० रइं B, F, G—वियसंति A; विहसंति H—जए नेहो A—दूरे वि ट्ठिया सुहाविंति D, H.

८१ मम्मवेहं D—दुम्मए A, E—कडुयकसं A.

८२ असंतेहि य C—वियमित्तो C, E.

८३ परहियं पि तो कुज्जा H—अप्पहियं मुट्ठ D

८४ अलियदरिद्दे H; °विमुक्को D—°मइए C: नवनियमधम्ममइए A, D: °धम्मीए H—होंति E, H.

८५ लज्जयसरीयाउ D, H—तद्दाउ A.

८६ कुज्ज D— मइलाइं H.

८७ मरिसेइ जं समत्थो F २—जं जे A; जं जो B, E; जं च C; जं जं G— खमइ B—जस्स F २— गव्वियो होइ A, F २ तिसु एहि B, C, E, G.

८८ अगुवत्तइ A— रक्खइ A, E, F, G— गुणं F— सो गावर B, C, G; सो गावरं F; सो न कु H—वि व दुल्लहो B; वि दुल्लहो E; यवल्लहो A.

८९ सग्ग° A— इन्दियकु° A— व जम्मो A— अहम्मेग A, D, F, G.

९० पउरिसं A— परकलत्तपरिहरगं A, D, H—°रहियं जम्मं A— गाढाइत्ताग A, H— निव्वहइ A, D, H

९१ असुगंता A; असुअगंता G— कह एइ B.

९२ काहं C, E— खगम्मि D— सिढिलेह D—°सिढिलियागं A, C, E, G.

९३ अकु विय F, G; अकुट्ठिय A, B, C, E— जाय C— तेहिं A; तागं D— परिहरंतागं A; परिहरंतेहिं D.

९४ पुरिसो A—रंनो A—न जंपए दीगो A— विक्कायागइ B; विक्कागइ C, E; वीकिगइ A.

९५ वे B, C, F, G; दूवे E— सिरी A— भवंता A— निवत्तंति A.

९६ दुन्नि A; दु विय D; दोन्नि E; वेन्नि B, C, G— उत्तिम-पुरिसाग मागवंताग A— विलहल° A; वलहल° D; विलहल V, F.

९७ अहिवं D, H— पेरिया E— पिंडिऊग A; कड्डिऊग D, H— औय D, H— भगंति A; पवदंति E; वदंति G— लज्जा-महासत्ता A; दीगसरा E.

VAJJĀLAGGAM

A PRAKRIT ANTHOLOGY WITH
SANSKRIT VERSION.

BY
JULIUS LABER

FASCICLE III

PRINTED AT THE CALCUTTA ORIENTAL PRESS LTD.
AND PUBLISHED BY
THE ROYAL ASIATIC SOCIETY OF BENGAL

CALCUTTA

1944

BIBLIOTHECA INDICA

Work No. 227

VAJJĀLAGGAM

A PRAKRIT ANTHOLOGY WITH
SANSKRIT VERSION.

FOREWORD

As early as 1912, the General Secretary of the Asiatic Society of Bengal received a letter (31st May 1912) from Prof. Hermann Jacobi, Professor of Sanskrit, Bonn University, saying that he was returning to the Society by Registered Post the Manuscripts of the Vajjalaggam which were then being edited by his former pupil Mr. Julius Laber of Cologne. Provision for the publication of this Prakrita Text (wrongly characterised as an Anthology of *Pāli* verses, as pointed out by Prof. Jacobi) was already made in the budget of 1912. But apparently owing to financial difficulties, Mr. Laber was informed in a letter dated 22nd July 1913, that further publication of the work was postponed. Mr. Laber in a letter dated 20th October 1913 to the then Secretary of the Asiatic Society, Capt. C. L. Pearce, sadly expostulated against the postponement and hoped that the Society will find "a means to finish the printing of the Vajjalaggam, otherwise the whole work would have been done without any use." He had the satisfaction of receiving a fresh batch of proofs in November 1913 showing that the Society had resumed printing of the work at the B. M. Press. We know that thanks to the invitation accorded by the University of Calcutta through the initiative of Sir Asutosh Mookerjee, Prof Jacobi and his learned colleague Dr. H. Oldenburg of Göttengen visited Calcutta and delivered a series of valuable lectures on Indology as Readers to the University. I had the privilege of accompanying Prof. Jacobi to Sir Asutosh as well as to Mm. Haraprasad Sastri who discussed many problems of Prakrita literature with Prof. Jacobi who was an acknowledged authority on that branch of Indian literature. Prof. Jacobi collected many rare Mss. on Jaina Prakrita which he published later on

